पाणिनीय-प्रवेशिका

AN INTRODUCTION IN SANSKRIT GRAMMAR

FIRST PART

BY

VAIDYA-Pt. RAMSWARUP SHASTRI,

FORMERLY

HEAD PANDIT SHREE GOVERDHAN HIGH SCHOOL,

NATHDWARA.

EDITED BY

Pt. SHYAMANAND JHA

PRINCIPAL J. V. M. COLLEGE, BOMBAY.

1st Edition
1000 Copies

1939

Price
10 Annas

भूमिका ।

अये सहृदयहृदयशिरोमणयः ! स्वाध्यायविध्यासक्तबुद्धयो गीर्वाणवाणीचरणाम्भोज-परिचरणपरायणा मनीषिणः !

व्यवहारव्यूहप्रवर्त्तकानां प्रमाणानां सर्वेषामपि मूर्द्धानमध्यारोहति शब्द एवेति नात्र विचिकित्सते कश्चिद्विपश्चिदपश्चिमः, शब्दश्च एकोऽपि सम्यक् ज्ञायमानः सुप्रयुक्तः कामगवीत्वमास्कन्दति । भगवान् पतञ्जलिरपि एकः शब्दः सम्यक्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति स्पष्टमाचष्ट । व्याकरणेन कोषेण दशविधविकृतिभिश्च शब्दान् ज्ञातुमीशते जिज्ञासवः । तत्र कोषेण तज्ज्ञानमशक्यमिव निश्चिनोमि शब्दानां सीमाराहित्येन कथङ्कारं प्रतिपदपाठैस्तान् प्रत्येतुं प्रभवेत् कोऽपि । अतएव श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः नान्तं जगाम किं पुनरद्यत्वे यः सर्वथा चिरंजीवति स वर्षशतं जीवति इति । दशविधविकृतिभिर्जटामालेल्यादिभिरपि नैव शब्दा झटिति ज्ञानपदवीमारोढुं शक्यन्ते विकृतीनां रीतिरतीवश्रमसाध्यतया नितरां पौरुषपरतामूरीकरोति । तदिदं परिशेषेण व्याकरणमेव शब्दज्ञानाय लघुतमं साधनमित्यवधातुं पामरा अपि पारयन्त्येव तदेव च द्वारीभूय सर्वशास्त्राध्ययनाधिकारं प्रसूते यथेदं स्मरन्ति सुधियः—काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति ।

संस्कृतभाषैव आर्य्यधर्म्मग्रन्थानवतारयति बोधभूमिम्, भारतमेकसूत्रे निबद्धुं तदीय-संस्कृतिञ्च रक्षितुं क्षमते । परन्तु संस्कृतभाषाज्ञानमनिवार्य्यमपि गम्भीरतया नवीनपद्धतेरभावेन च न कलयितुं सत्वरं प्रसज्यन्ते केचन अधिकन्तु विषादन्तन्वन्ति ये इदानीन्तनीषु गीतापाठशालासु वेदपाठालयेषु स्वाध्यायशालासु च सवृत्तिपाणिनिसूत्रमात्राभ्यसने शुष्यदसवोऽपि शिशवो न शब्दज्ञानलवोदयेनानुयन्ति ।

प्रकामं प्रयस्य त्रिभिश्चतुर्भिर्वा वत्सरैरुत्तरीतुं पारयन्ति प्रथमपरीक्षाम्, हायनचतुष्टयेन मध्यमाम् त्रिभिश्च तैः शास्त्रिकक्षाम्, चरमे वर्षत्रयेण आचार्य्यपरीक्षामुत्तीर्य व्याकरण-महार्णवमुत्तीर्णा अक्षोरातिथ्यमञ्चन्ति तीक्ष्णबुद्धयः, मन्दास्तु जन्मैव तत्र नयन्ति शास्त्रान्तरज्ञानचर्चा तु दूरमध्यास्ते ।

संस्कृतशालासु हाईस्कूलप्रभृतिषु च एकत्र मुख्यतयाऽपरत्र गौणतया संस्कृतविषयः स्थितिं निषेवते परन्तु सर्वत्रैव द्राघीयांसमायुषो व्ययं व्याकरणे नैव केचनापि कामयन्ते कर्त्तुम् ।

अस्यां स्थितौ अन्यविधं नावीन्यं विन्यस्यन्ती काचन सुबोधा साधीयसी सरणिरनिवार्य्यताद्वारं मुमुक्षति व्याकृतेः, यया सत्वरं व्याकरणपाटवं शास्त्राध्ययनप्रवृत्तिश्च सिद्धयेताम् ।

तदिदमभावं पूरयितुकामो वैद्यः पण्डितश्रीरामस्वरूपशर्मा शास्त्री तथा प्रायतिष्ट लघुतमेनानेन पुस्तकेन यथा गौणतयाऽपि संस्कृतमधीयानानामन्तेवसतां संस्कृते भाषणलेखनयोर्व्याप्तिमती शक्तिर्द्रागेव हृदयतटमाश्लिक्ष्यति ।

हाईस्कूलमाजुषमाणा अपि छात्राः प्रस्तुतेनांग्लार्थटिप्पणेन प्रभूतं साहाय्यमनुभूय संस्कृतभाषाज्ञानमनायासेनाचिरेणावसरेण च लप्स्यन्ते ।

नवीनपद्धतिमाधाय ग्रन्थमिमं संग्रन्थयन् सुश्लोको भवांल्लेखकः संल्लापबहुलाननुस्मारितप्रक्रियाकलान् सपाठ्यक्रमान् परिचितशब्दसङ्गमान् हृदयङ्गमान् पाठान् न्ययुक्त । तेषु च क्रममनतिक्रम्य व्याकरणविषयान् सूत्रनिर्देशेन सरलानवद्याभ्यां गद्यपद्याभ्यां वैशद्येनारक्षीत् । परिशिष्टे च धातु-शब्दरूपाणि निरदैक्षत् । समुदितमिदं पुस्तकस्यास्य सर्वाङ्गीणशोभावैभवमुपादेयताञ्च व्यनक्ति ।

विश्वसिमि गीर्वाणवाणीगुणगणानां रमणीयतामालोक्य तदीयचरणसपर्य्यामारचयन्तो विचक्षणा शिक्षाविभागाध्यक्षास्तत्तत्पाठशालासु पुस्तकमिदं पाठ्यतयोपयोज्य विदुषो लेखकस्य श्रमं फलैरन्वाययिष्यन्तीति ।

श्रीश्यामानन्दझा

न्यायव्याकरणसाहित्यदर्शनपोस्टाचार्य्यः ।

निविष्टव्याकरणविषयानुक्रमः ।

विषयाः ।	पृष्ठाङ्काः ।	विषयाः ।	पृष्ठाङ्काः ।
संज्ञाप्रकरणम्	१—३	णत्वविधानम्	१८
अकारान्ताः पुंल्लिङ्गाः	४—५	द्वित्वविधानम्	१३
इकारान्ताः पुंल्लिङ्गाः	६	षत्वविधानम्	२५–२७
ईकारान्ताः ,,	१६	अव्ययाः	२५–२६
उकारान्ताः ,,	७	लट् लकारः	४
ऊकारान्ताः ,,	८	लिट् ,,	८–१३
ऋकारान्ताः ,,	९	लुट् ,,	९
एकारान्ताः ,,	१७	लृट् ,,	५
ओकारान्ताः ,,	१७	लोट् ,,	७
औकारान्ताः ,,	१७	लङ् लकारः	६
आकारान्ताः स्त्रीलिङ्गाः	१०	विधौ लिङ्	१०
इकारान्ताः ,,	१२	आशिषि लिङ्	११
ईकारान्ताः ,,	११	लुङ् लकारः	१५
उकारान्ताः ,,	१४	लृङ् लकारः	१६
ऊकारान्ताः ,,	१३	कर्त्ता	४
ओकारान्ताः ,,	१७	कर्म	५
औकारान्ताः ,,	१७	करणम्	६
नपुंसकलिङ्गशब्दाः	१८	संप्रदानम्	७
हलन्तशब्दाः	१९	अपादानम्	८
सर्वनामशब्दाः	२१	षष्ठी	९
संख्यावाचकशब्दाः	२४	अधिकरणम्	१०
उपसर्गाः	२०	संबोधनम्	११
पुरुषाः	३१	भ्वादयः	१०
वचनानि	३३	अदादयः	११
अच्सन्धिः	५–११	जुहोत्यादयः	१२
प्रकृतिभावसन्धिः	१२	दिवादयः	१३
हल्सन्धिः	१४–१९	स्वादयः	१४
विसर्गसन्धिः	२१–३२	तुदादयः	१५
स्वादिसन्धिः	३२–३४	रुधादयः	१६

विषयाः ।	पृष्ठाङ्काः ।	विषयाः ।	पृष्ठाङ्काः ।
तनादयः	१७	अव्ययीभावः	३४–३५
क्रादयः	१८	तत्पुरुषः	३६–३७
चुरादयः	१९	बहुव्रीहिः	४०–४१
ण्यन्तप्रक्रिया	२१	कर्मधारयः	४४–४५
सन्नन्तप्रक्रिया	२४	द्विगुः	३८–३९
यङन्तप्रक्रिया	२५–२६	द्वन्द्वः	४२–४३
यङ्लुक्प्रक्रिया	२७–२८	कृदन्तप्रत्ययाः	४५–५२
भावकर्मप्रक्रिया	२९	तद्धितप्रत्ययाः	४५–५२
नामधातवः	३३	स्त्रीप्रत्ययाः	४५–५२
आत्मनेपदप्रक्रिया	२०	शब्दरूपाणि	५३–६२
परस्मैपदप्रक्रिया	२०	धातुरूपाणि	६२–७२

OPENIONS.

I read a few portions from the Paṇiniya-praveshikā prepared by Vaidya Pandit Ramswarup Shastri of Nathadwara. It is designed for the purpose of introducing the beginners into the field of Sanskrit grammar. Interesting sentences both in prose and poetry are composed by the author, to illustrate the various grammatical formations. English meanings of the different Sanskrit words occurring in the lesson for the first time, are also given. So that the book may be used with great advantage even by our High School students as an aid to their study of Sanskrit grammar. I wish all success to the Praveshikā.

7th September 1939,
Bombay.

H. D. Velankar,
Professor of Sanskrit,
Wilson College, Bombay.

I have read a few pages of Vaidya Pandit R. S. Upadhyaya's Paniniya-Praveshika. The book is intended to make students' introduction to Panini's system easier and more interesting. It deserves patronage in Sanskrit Pathshalas and High schools.

12th September 1939,
Bombay.

A. B. Gajendragadkar,
Professor of Sanskrit,
Elphinstone College, Bombay.

I heartily congratulate Vaidya Pandit Ramswarup Upadhyaya for bringing out this Paniniya Praveshika for the use of the Sanskrit Students of Panini. All the lessons bear out a Systematic plan of arrangement based on the Sutras. Lessons, and dialogues on familiar topics will be found greatly interesting by the young learners. I have every hope, therefore, that he will feel his efforts amply rewarded if the students of Panini as also of Sanskrit—the Girvan Bhasha—our invaluable treasure—make full use of this book.

Secondary Traning College,
Bombay.
23-12-39.

N. R. Parasnis,
M. A., B. T., T. D. (Lond.)
Lecturer in Education.

श्रीः

पाणिनीय-प्रवेशिका

मङ्गलम् ।

श्रियां नाथं नमस्कृत्य ध्यात्वा च सुरभारतीम् ।
कुर्वे छात्रोपकाराय पाणिनीयप्रवेशिकाम् ॥

अथ संज्ञाप्रकरणम् ।

अ इ उ ण् १। ऋ ऌ क् २। ए ओ ङ् ३। ऐ औ च् ४। ह य व र ट् ५। ल ण् ६। ञ म ङ ण न म् ७। झ भ ञ् ८। घ ढ ध ष् ९। ज ब ग ड द श् १०। ख फ छ ठ थ च ट त व् ११। क प य् १२। श ष स र् १३। ह ल् १४।

शिवसूत्राण्यथेमान्यणादिसंज्ञार्थकान्यतः ।
सानुबन्धं प्रदर्श्यन्त एतेषामन्त्यका इतः ॥ १ ॥
हकारादिषु वर्णेषूच्चारणार्थः स्वरः स्मृतः ।
अकारो यस्तु लण्मध्ये तस्येत्संज्ञा विधीयते ॥ २ ॥
हलन्त्यमिति[1] सूत्रेणोपदेशान्त्या इतो मताः ।
पदं पाणिनिसूत्रेष्वदृष्टमप्यनुवर्तते ॥ ३ ॥
सूत्रञ्चादर्शनं[2] लोपो लोपसंज्ञाविधायकम् ।
प्राप्तेत्वानां हलां लोपं तस्य[3] लोपोऽनुतिष्ठति ॥ ४ ॥
इद्वर्णा णादयोऽणादिसंज्ञानां सिद्धये मताः ।
आदिरन्त्येन[4]-सूत्रेण प्रत्याहारा अजादयः ॥ ५ ॥

सूत्राणि–1 हलन्त्यम् १।३।३ । 2 अदर्शनं लोपः १।३।१ उपदेशेऽजनुनासिक इत् १।३।२ । 3 तस्य लोपः १।३।९ । 4 आदिरन्त्येन सहेता १।१।७१ ।

चत्वारिंशद्विधीयन्ते ह्यधिकाः शाब्दकोविदैः ।
[1]ऊकालोऽज्झ्रस्वदीर्घप्लुतः सूत्रं विदधात्यचाम् ॥ ६ ॥
ह्रस्वदीर्घप्लुतत्वानि वर्णानां समनुक्रमात् ।
उच्चैरुच्चारणात्तेषां जायतेऽचामुदा[2]त्तता ॥ ७ ॥
पुनर्नीचैः स्वरैः प्रोक्तास्ते प्रयान्त्यनुदा[3]त्तताम् ।
स्वरितत्वं प्रयान्त्यन्ये समाहा[4]रेण बोधिताः ॥ ८ ॥
प्रोच्यतेऽत्र मु[5]खनासिकावचनोऽनुनासिकः ।
समानास्य[6]प्रयत्नानां वर्णानां स्यात्सवर्णता ॥ ९ ॥
ऋकारल्कारयोः शाब्दे मिथः सावर्ण्यमुच्यते ।
ओष्ठौ स्थानमुकारस्योपध्मानीयपवर्गयोः ॥ १० ॥
घ्राणं ञमङणनानामेदैतोः कण्ठतालुनी ।
कण्ठोष्ठस्थानमोदौतोर्वकारस्य रदौष्ठकम् ॥ ११ ॥
नासिकासंभवस्थानमनुस्वारस्य प्रोच्यते ।
जिह्वामूलीयभवनं जिह्वामूलं निगद्यते ॥ १२ ॥
बाह्याभ्यन्तरभेदाभ्यां यत्नो द्विविध उच्यते ।
ईषत्स्पृष्टस्पृष्टेषद्विवृतविवृतसंवृताः ॥ १३ ॥
स्पर्शानामिह वर्णानां यत्नः स्पृष्टो बुधैर्मतः ।
अन्तःस्थानान्तु तैरीषत्स्पृष्टो यत्नः प्रकीर्तितः ॥ १४ ॥
स्वराणां विवृतो यत्न ईषद्विवृतमूष्मणाम् ।
अकारस्य तु ह्रस्वस्य प्रयोगे संवृतो मतः ॥ १५ ॥
प्रक्रियाया दशायान्तु तस्य स विवृतो भवेत् ।
बुधैर्बाह्यप्रयत्नानामेकादशविधा स्मृता ॥ १६ ॥
श्वासो विवारसंवारौ नादघोषावघोषकः ।
महाप्राणाल्पप्राणोदात्तस्वरितानुदात्तकाः ॥ १७ ॥

---

1 ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७ । 2 उच्चैरुदात्तः १।२।२९ । 3 नीचैरनुदात्तः १।२।३० । 4 समाहारः स्वरितः १।२।३१ । 5 मुखनासिकावचनोऽनुनासिकः १।१।८ । 6 तुल्यास्यप्रयत्नं सवर्णम् १।१।९ ।

नादा घोषाश्च संवारा हश्विभक्तिगता मताः ।
अल्पप्राणास्तु वर्गाणामादिपञ्चतृतीयकाः ॥ १८ ॥
महाप्राणप्रयत्नास्ते शल्द्वितीयचतुर्थकाः ।
कादिमान्ता मताः स्पर्शा यरश्चान्तःस्थसंज्ञकाः ॥ १९ ॥
उच्यन्ते शल ऊष्माणः स्वराः प्रोक्ता अचो बुधैः ।
ऽकऽखाभ्यां पूर्वगः सामिविसर्गसदृशस्तु यः ॥ २० ॥
जिह्वामूलीयसंज्ञः स विद्वद्भिः परिभाषितः ।
ऽपऽफाभ्यां पूर्वगः सामिविसर्गसदृशोऽपरः ॥ २१ ॥
उपध्मानीय इत्युक्तो वर्णशिक्षाविचक्षणैः ।
[1]अणोऽविधीयमानस्योदितश्चापि परस्परम् ॥ २२ ॥
सावर्ण्यबोधकत्वं स्यात्प्रमाणं तदिदं मतम् ।
परेणैवेण्ग्रहाः सर्वे पूर्वेणैवाण्ग्रहा मताः ॥ २३ ॥
ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ।
कु-चु-टु-तु-पवः प्राज्ञैरुदितः परिकीर्त्तिताः ॥ २४ ॥
अ इ उ इति वर्णानामष्टादशविधा स्मृता ।
त्रिंशद्भेदाः समासेन वर्णयोर्ऋलृकारयोः ॥ २५ ॥
एचो द्वादशधा प्रोक्ता भेदाभ्यां यवला द्विधा ।
अननुनासिकानुनासिकाभ्यां शाब्दकोविदैः ॥ २६ ॥
वर्णानामिह परः सन्निकर्षः [2]संहिता मता ।
हलां [3]योगस्तु संयोगः सुप्तिङन्तं [4]पदं मतम् ॥ २७ ॥
एकमात्रो भवेद्ध्रस्वो द्विमात्रो [6]दीर्घ उच्यते ।
प्लुतस्त्रैमात्रिको ज्ञेयो ह्रस्वो योगे [7]गुरुर्मतः ॥ २८ ॥
उपोद्घातमिमं संज्ञापरिभाषाविधायकम् ।
पाणिनीये विविक्षूँस्ताँश्छात्रानादौ प्रबोधयेत् ॥ २९ ॥

---

1 अणुदित्सवर्णस्य चाप्रत्ययः १।१।६९ । 2 परः सन्निकर्षः संहिता १।४।१० । 3 हलोऽनन्तराः संयोगः १।१।७ । 4 सुप्तिङन्तं पदम् १।४।१४ । 5 ह्रस्वं लघु १।४।१० । 6 दीर्घं च १।४।१२ । 7 संयोगे गुरु १।४।११ ।

प्रथमः पाठः ।

श्रीकृष्णः	गणेशः
मानवः	वासवः
पौरः	विनीतः
बल्लवः	बान्धवः
अस्ति	भवति

[1]गणेशोऽवति विघ्नेशः श्रीपतिं श्रयते जनः ।
कृष्णः काङ्क्षति कल्याणं रामो रक्षति मानवान् ॥
प्राज्ञा मुखेन भाषन्ते[2] मूर्खस्तेनापभाषते ।
इदमस्ति मुकुन्दाय पुस्तकं रुचिरं नवम् ॥
पौराः पिबन्ति[3] कूपेभ्यो जलमानीय मानवाः ।
अहमस्मि विनीतस्य रामचन्द्रस्य बान्धवः ॥
छात्राः पठन्ति, गोविन्दः पट्टे लिखति लोकते ।
तौ वृक्षौ स्तः, तडागस्य तीरं गच्छति बालकः ॥
माधवो मन्दिरं याति, मेघो गर्जति वर्षति ।
रमस्व बल्लवैः साकमुपेन्द्र ! यमुनातटे ॥

अर्थः—श्रीकृष्णः Lord Krishna. मानवः A man. गणेशः The god Ganesha. वासवः Indra. पौरः A citizen. विनीतः Gentle. बल्लवः A cow-herd. बान्धवः A brother. अस्ति Is. भवति Is. अवति Protects. विघ्नेशः Protector. श्रीपतिः God Vishnu. श्रयते Takes refuge. जनः A man. काङ्क्षति Wishes. कल्याणम् Welfare. रक्षति Protects. प्राज्ञः The wise. भाषते Speaks. इदम् This. मुकुन्दाय For Mukunda. पुस्तकम् A book. रुचिरम् Fine. नवम् New. पिबन्ति Drink. कूपः A well. आनीय Having brought. अहम् I. अस्मि Am. छात्रः A Student. पट्टः A board. लिखति writes. लोकते Looks at. तौ They two. वृक्षः A tree. स्तः They two are. तडागः A tank. तीरम् A bank. गच्छति Goes. बालकः A boy. मन्दिरम् A temple. याति Goes. मेघः A cloud. गर्जति Roars. वर्षति Rains. रमस्व Play. साकम् With. तटम् A bank.

व्याकरणम्—अस्मिन् पाठेऽध्यापका अकारान्तपुल्लिङ्गरूपाणि [4]लट्लकाररूपाणि, [5]कर्तृपदानि [6]अज्ञीनवर्णानां परेषु संयोगमप्युदाहरणान्तरेभ्यश्च शिक्षयेयुश्छात्रान् ।

---

1 प्रतिपादिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २।३।४६ । 2 अनुदात्तङित आत्मनेपदम् १।३।१२ । 3 शेषात्कर्तरि परस्मैपदम् १।३।७५ । 4 वर्तमाने लट् ३।१।१२३ । 5 स्वतन्त्रः कर्त्ता १।४।५४ । 6 अज्ञीनं परेण संयोज्यम् ।

द्वितीयः पाठः ।

भास्करः	चन्द्रः
उपाध्यायः	शूरः
विप्रः	वामनः
उषसि	सम्प्रति
पठिष्यति	गमिष्यति

सुध्युपास्यो जगन्नाथः पाठयिष्यत्यहर्मुखे ।
मध्वरिर्भगवान् कृष्णो लोकान् यास्यत्यधोक्षजः ॥
धात्रंशो लाकृतिर्भूत्वा द्वारं यास्यति भूपतेः ।
द्रक्ष्याम्यहमुपाध्यायमन्वेष्याम्यालयं लघु ॥
यथाविध्यच्युतं विप्राः प्रत्यर्चिष्यन्त्यनुक्षणम् ।
नन्विमौ नगरं शूरौ झटित्येव गमिष्यतः ? ॥
पठिष्यन्त्यत्र शालायां छात्राः शास्त्राण्यनुक्रमात् ।
उषस्यध्यापकं शिष्याः समेष्यन्त्याश्रवा गृहात् ॥
सम्प्रत्येहि बटो ! गेहं दध्यद्धि मध्विदं नय ।
वृत्तान्यधिगमिष्यामि, कथां श्रोष्याम्यभीप्सिताम् ॥

अर्थः—भास्करः The sun. चन्द्रः The moon. उपाध्यायः A teacher. शूरः Brave, A hero. विप्रः A Brahmin. वामनः A dwarf. उषसि Early in the morning. सम्प्रति Now. पठिष्यति Will read. गमिष्यति Will go. सुध्युपास्यः A learned man or God. पाठयिष्यति Will teach. अहर्मुखे In the morning. मध्वरिः God Krishna. भगवान् God. लोकः People. पास्यति Will protect. अधोक्षजः Whom senses cannot approach. धात्रंशः Sage Nārad. भूत्वा Having become. द्वारम् A door. यास्यति Will go. भूपतिः A king. द्रक्ष्यामि Will see. अन्वेष्यामि Will follow. आलयम् A house. लघु Quickly. यथाविधि According to the rites. प्रत्यर्चिष्यन्ति Will worship. अहरहः Every day. ननु Used in question. इमौ These two. झटिति Without delay. अत्र Here. शालायाम् In the school. शास्त्राणि Scriptures. अनुक्रमात् According to the order. अध्यापकः A teacher. शिष्यः A pupil. समेष्यन्ति Will come. आश्रवः Polite. गृहम् A house. एहि Come. बटुः A boy. गेहम् A house. दधि Curd. अद्धि Eat up. मधु Honey. नय Carry. वृत्तम् News. अधिगमिष्यामि Will know. कथा A story. श्रोष्यामि Will hear. अभीप्सिता Desired.

व्या०—अस्मिन् पाठेऽध्यापकाः[1] सकर्मकर्तृपदानि, [2]लृट्लकाररूपाणि, अकारान्तशब्दानां पुंरूपाणि, [3]यण्कार्य्यञ्चावगमयेयुश्छात्रान् ।

1 कर्तुरीप्सिततमं कर्म्म १।४।४९, कर्म्मणि द्वितीया २।३।२ । 2 लृट् शेषे च ३।३।१३ । 3 इको यणचि ६।१।७७ ।

तृतीयः पाठः ।

कपिः	हरिः
गिरिः	निशापतिः
अलिः	मुनिः
दुन्दुभिः	अहिः
सखा	पतिः

गोपिका हरये भक्त्या गव्यं तस्मायुपाहरन् ।
विष्णवे बलिमाहर्त्तुं विधिं गोपाः समाचरन् ॥
हनूमान् रामसेनायां कपीनां नायकोऽभवत् ।
श्रुतिभिः पावनं भूपो दुन्दुभेर्ध्वनिमशृणोत् ॥
गिरावविशतां शावाविमावत्र हरेर्द्रुतम् ।
प्रदीपैर्भास्वरैर्भव्ये प्रकाशो भवनेऽभवत् ॥
आनयन् धार्म्मिका गेहं पवित्रं यमुनोदकम् ।
तरणावुद्गते नाव्यः सिन्धावासीज्जलोच्चयः ॥
मठाद् वैनायकाच्चौराः पूजावस्तून्यपाहरन् ।
पुष्पकेण विमानेनोपेन्द्रः प्रायाद्दिवं जवात् ॥

अर्थः—कपिः A monkey. हरिः God. गिरिः A mountain. निशापतिः The moon. अलिः A bee. मुनिः A sage. दुन्दुभिः A drum. अहिः A snake. सखा A friend. पतिः A Protector. गोपिका A cowherd's wife. भक्तिः Devotion. गव्यम् The cow's milk or curd. तस्मै For him. उपाहरन् Have brought. विष्णवे For Vishnu. बलिः A sacrifice. आहर्तुम् To carry. विधिः Means. गोपः A cowherd. समाचरन् Performed. सेना An army. नायकः A leader. अभवत् Was. आनयन् Have brought. धार्म्मिकः Pious. पवित्रम् Sacred. उदकम् Water. तरणिः The sun. उद्गतः Risen. नाव्यः Navigable सिन्धुः A river. उच्चयः A group. मठः-Temple. चौरः A thief. वस्तु A thing. अपाहरन् Made away with. विमानम् An aeroplane. उपेन्द्रः Vishnu. प्रायात् Went. दिवम् Heaven. जवात् Quickly.

व्या०—अस्मिन् पाठेऽध्यापकाः इकारान्तपुल्लिङ्गरूपाणि, [1]अय्-अव्-आयादीनामादेशानां लक्ष्याणि, [2]करणकारकपदानि [3]लङो रूपाणि च शिक्षयेयुश्छात्रान् ।

---

1 एचोऽयवायावः ६।१।७५। वान्तो यि प्रत्यये ६।१।७९। 2 साधकतमं करणम् १।४।४२ कर्तृकरणयोस्तृतीया २।३।१५। 3 अनद्यतने लङ् ३।२।१११ ।

चतुर्थः पाठः ।

विधुः	साधुः
शिशुः	ओतुः
पशुः	शत्रुः
भानुः	तरुः
केतुः	पटुः

क्रीड त्वं शिशुभिः साकं मोपेन्द्र ! क्रुध्य[1] शंभवे ।
नयन्तु धार्म्मिका गेहं साधवो नर्म्मदोदं[2]कम् ॥
नमो[3]ऽस्तु जिष्णवे स्वाहा शंभवे, विष्णवे स्वधा ।
भानवे रोचतां[4] पूजा, भक्तिर्ज्ञानाय कल्पताम्[5] ॥
हरये प्रीयतां[5] भक्तः, पत्ये संप्रीयतां[6] सती ।
शिशुभ्यः कन्दुकं देहि[7], भिक्षवे भोजनोदकम् ॥
अन्यर्द्धये यजत्वेष[8] ज्ञानाय सेवतां[9] गुरुम् ।
लाघवाल्लिखितः पट्टे तवल्कारो[10] न शोभते ॥
तस्मा असाधवे यच्छं नौतवे गोरसौदनम् ।
निगृहाण गदं साधो ! पथ्यमुष्णोदकं पिब ॥

अर्थः—विधुः The moon. साधुः A good man. शिशुः A baby. ओतुः A cat. पशुः A beast. शत्रुः An enemy. भानुः The sun. तरुः A tree. केतुः A flag. पटुः Clever. क्रीड Play. त्वम् Thou. मा क्रुध्य Do not be angry. नमः A bow जिष्णुः Victorious. स्वाहा and स्वधा An oblation रोचताम् Be pleased. ज्ञानम् knowledge. कल्पताम् Is able to produce. प्रीयताम् Be pleased. भक्तः A devotee. पत्ये For the husband. सती A chaste woman. कन्दुकः A ball. देहि Give. भिक्षुः A beggar. भोजनम् Food. अन्यर्द्धये For the benefit of others. यजतु Secrifice. एषः This. सेवताम् serve. गुरुः A teacher. लाघवात् Intelligently. लिखितः Has been written. तवल्कारः The letter. ल् written by you. शोभते Looks beautiful. असाधुः Bad. यच्छ Give. गोरसः Milk. ओदनम् Rice. निगृहाण Control over. गदः Disease. पथ्यम् Wholesome. उष्णम् Hot. पिब Drink.

व्या०—अस्मिन् पाठेऽध्यापका उकारान्तपुंरूपाणि, सम्प्रदानकारकपदानि, लोदलकाररूपाणि, गुणस्योदाहरणानि चावगममेयुश्छात्रान् ।

---

1 कर्म्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२ चतुर्थी संप्रदाने । २।३।१३ । 2 नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २।३।१६ । 3 क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः १।४।३७ । 4 क्रृपि संपद्यमाने च । 5 रुच्यर्थानां प्रीयमाणः १।४।३३ । 6 उरण् रपरः १।१५१ । 7 तुमर्थाच्च भाववचनात् २।३।१५ । 8–9तादर्थ्ये चतुर्थी वाच्या । 10 आद्गुणः ६।१।८७ ।

पञ्चमः पाठः ।

आत्मभूः	कर्कन्धूः
खलपूः	वर्षाभूः
स्वयम्भूः	हूहूः
करभूः	पुनर्भूः
भल्लूः	उल्लूः

कृष्णैकत्वमुपाजग्मुर्नीलभल्लूकपङ्क्तयः ।
वर्षाभुवो जलौघेषु बभूवुर्जलदागमे ॥
उपैधाञ्चक्रिरे तस्य देवैश्वर्याण्यनेकधा ।
कृष्णौत्कण्ठ्यं हि गोपीनां जज्ञेऽरण्यं गते हरौ ॥
प्रौढबुद्धिं विधातारं विश्वस्यात्मभुवं जगुः ।
भुवनौघः समः प्रौहे तस्मादेव स्वयंभुवः ॥
अपि भीमाकृतेरुल्लोर्बालकौ प्राच्छतो भयम् ?
जपालताभ्यः पुष्पाण्यानिन्युः प्रैष्यजना वनात् ॥
हूहूर्गन्धर्वभेदानां सैका जातिर्दिवौकसाम् ।
कर्षका वृषभानेतान् प्रष्ठौहश्चक्रिरेतराम् ॥

अर्थः—आत्मभूः The creator. कर्कन्धूः The fruit. (बैरम्). खलपूः A good man. वर्षाभूः A frog. स्वयम्भूः The creator. हूहूः A kind of god. करभूः Nail. पुनर्भूः A frog. भल्लूः A bear. उल्लूः An owl. एकत्वम् Sameness. उपाजग्मुः Went. नीलः Black. पङ्क्तिः A line. जलदागमः The rainy season. उपैधाञ्चक्रिरे Grew on. तस्य His. ऐश्वर्याणि Riches. अनेकधा By all means. औत्कण्ठ्यम् A keen desire. हि Surely. जज्ञे Grew on. अरण्यम् A forest. भुवनम् The world. समः All. प्रौहे Took birth. तस्मात् From him. अपि Used in questioning. भीमः Fearful. आकृतिः Appearance. प्राच्छतः They two get. जपालता. A kind of Creeper. पुष्पाणि Flowers. आनिन्युः Brought. प्रैष्यजनः A messenger. जातिः Race. दिवौकसः The gods. कर्षकः A farmer. वृषभः A bull. प्रष्ठौहः Who carries the plough on his shoulder.

व्या०—अस्मिन् पाठेऽध्यापका अकारान्तपुंरूपाणि, [1]अपादानपदानि, लिँट्लकाररूपाणि, [2]वृद्धेरुदाहरणानि च शिक्षयेयुश्छात्रान्।

---

1 ध्रुवमपायेऽपादानम् १।४।२४ अपादाने पञ्चमी १।४।३१। भीत्रार्थानां भयहेतुः १।४।२५। भवः प्रभवः ।२।३।२५ 2 परोक्षे लिट् ३।२।११५ 3 वृद्धिरेचि ६।१।५५ एत्येधत्यूठ्सु ६।१।५९ प्रादूहोढोढ्येषेष्येषु । उपसर्गादति धातौ ६।१।९१

षष्ठः पाठः ।

पाता	कर्त्ता
गन्ता	दाता
पिता	विधाता
भ्राता	पक्ता
गमा	क्रोष्टा

पातः शिवेहि ! पूजां ते विधातारो मनीषिणः ।
शिवायोंनम, ईशाय स्वाहास्तु, पितृभ्यः स्वधा ॥
प्रेजिष्यन्ते कुमारास्ते पातारो वल्लभा नृणाम् ।
मार्तण्डाग्नावुपोषन्ति कन्दमूलफलान्यपि ॥
गमुल् मनीषिणस्तस्य भवितार्थसमागमः ।
क्रोष्टारः श्वपदां धूर्त्ता हन्तारो लघुजीविनाम् ॥
प्रोधीयन्ति जनाः पुण्या दातारस्तीर्थनायकम् ।
भ्रातर्भुक्तन्त्वयेदानीं प्रभाते क्वेव भोक्ष्यसे ? ॥
पुरा विधाता भाष्याणां मुनिर्जज्ञे पतञ्जलिः ।
सारङ्गाणामयं हन्ता पालितोतुः पतत्रिणाम् ॥

अर्थः—पाता A protector. कर्त्ता A doer. गन्ता Walker. दाता A giver. पिता A father. विधाता The creator. भ्राता A brother. पक्ता A cooker. गमा One who goes. क्रोष्टा A jackal. एहि Come. ते Your. विधातारः Will do. मनीषिणः Wise persons. प्रेजिष्यन्ते Will flourish. मार्तण्डः The sun. अग्निः The fire. उपोषन्ति Will ripen. कन्दः A medical root. मूलम् Root. भविता Will be. अर्थः Money. समागमः Gain. श्वपाद् A beast. धूर्त्ताः-Cunning. हन्तारः Will kill. प्राणी A being. प्रोधीयन्ति Gather together. पुण्यः Religious. तीर्थः A sacred place. भुक्तम् Eaten up. त्वया By you. इदानीम् Now. प्रभाते In the morning. क्व Where. भोक्षसे Will eat. पुरा In olden times. भाष्यम् A commentary. सारङ्गः A kind of bird. अयम् This. हन्ता A killer. पालितः Tamed. पतत्री A bird.

व्या०—अस्मिन् पाठेऽध्यापका ऋकारान्तशब्दानां रूपाणि, [1]सम्बन्धपदानि, [2]लुटो रूपाणि, [3]पररूपोदाहरणानि च पाठयेयुश्छात्रान् ।

---

1 षष्ठी शेषे २।३।५० । 2 अनद्यतने लुट् ३।३।१५ स्यतासी लृलुटोः ३।१।३३ । 3 एङि पररूपम् ६।२।९४ अचोऽन्यादि टि १।१।६४ शकन्ध्वादिषु पररूपं वाच्यम् । ओत्वोष्ठ्योस्समासे वा *ओमाङोश्च ६।१।९५ ।

सप्तमः पाठः ।

शारदा	पद्मा
कन्या	शाखा
अजा	महिला
चटका	कोकिला
वीणा	शिखा

दैत्यारयो वने वीरा नाशयेयुर्निशाचरान् ।
श्रीशोऽवतु, भवानीशो विद्यां देयाद्यशस्करीम् ॥
लोकाः सौख्येन पश्येयुर्द्वितीयायां विधूदयम् ।
जानीयुर्द्विविधं रूपं होतृकारस्य पण्डिताः ॥
लम्बकर्णा महाङ्गानां प्रशंसेयुर्गतिक्रियाम् ।
लतासूत्तमशोभासु पुष्पौघे स्यान्मधूच्चयः ॥
अर्कक्षुपान्निराकुर्युः समुक्षेयुर्जपालताः ।
पद्मायाश्चरणौ भक्त्या पूजयेयुः कुमारिकाः ॥
बालिकैषाऽत्र शालायां पठेत्पाठं न खेलतु ।
मुस्ताभयासमङ्गाऽतिविषा हन्युः प्रवाहिकाः ॥

अर्थः—शारदा The goddess of learning. पद्मा The Goddess of wealth. कन्या A girl. शाखा A branch. अजा A goat. चटका A bird. कोकिला The cuckoo. वीणा A lute. शिखा The top. दैत्यारिः An enemy of the giants. वीरः A warrior. नाशयेयुः May kill. निशाचरः A demon. श्रीशः The lord of Laxmi. भवानीशः The god Shiva. विद्या Learning. यशस्करी Conferring glory. सौख्येन Fondly. पश्येयुः May see. उदयः Rising. जानीयुः Should know. द्विविधं रूपम् Having two forms. पण्डितः A learned man. लम्बकर्णः An ass. महाङ्गः A camel. प्रशंशेयुः May prefer. उत्तमा The best. शोभा Beauty. उच्चयः A heap. निराकुर्युः May root out. समुक्षेयुः May water. चरणौ Two feet. पठेत् May read. पाठः The lesson. हन्युः May kill. प्रवाहिका Diarrhoea.

व्या०—अस्मिन् पाठेऽध्यापका आकारान्तस्त्रीलिङ्गरूपाणि, [1]अधिकरणपदानि, [2]लिङो रूपाणि, [3]प्रथमगणीयधात्वन्तराणामपि लकारान्तरेषु रूपाणि, [4]सवर्णदीर्घताया उदाहरणानि च शिक्षयेयुश्छात्रान् ।

---

1 आधारोऽधिकरणम् १।४।४५। सप्तम्यधिकरणे च २।३।३६। 2 विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१। 3 कर्तरि शप् ३।१।६५। 4 अकः सवर्णे दीर्घः ६।१।१०९।

अष्टमः पाठः ।

कुमारी	महिषी
नारी	उपाध्यायी
जननी	वानरी
देवी	हरिणी
सरस्वती	दासी

हरेऽव विपदस्त्वं मां श्रीपतेऽनुगृहाण तम् ।
विष्णोऽवे रक्षतां श्रेष्ठ ! ज्ञानं देहि दयानिधे ! ॥
जनन्यो जागृयासुस्ता नक्तं तासां स्तनंधयाः ।
न रूयासुः प्रभूयासुश्चिराय चिरजीविनः ॥
पठ्यासुर्बालिकास्तत्र न पश्येयुरितस्ततः ।
कस्य जायेत नोत्कण्ठा दर्शनेऽस्या नृपस्त्रियः ॥
देवी सरस्वती पायाद् वीणापुस्तकधारिणी ।
सुषमैषाऽवरोधस्य राज्ञी दासीषु राजताम् ॥
अनुतिष्ठेयुराल्योऽस्या नियोगं राजसम्मताः ।
विद्यालयः कुमारीणां मन्दिरेऽत्र विशालताम् ॥

अर्थः—कुमारी An unmarried girl. महिषी A queen. नारी A woman. उपाध्यायी A female teacher. जननी A mother. वानरी A she-ape. देवी A goddess. हरिणी A female deer. सरस्वती The goddess of learning. दासी A maid servant. अव Protect. विपदः Misery. माम् Me. श्रीपतिः God vishnu. अनुगृहाण Do favour. विष्णुः God. अवेः Protect. दया Kindness. निधिः An ocean. जागृयासुः May remain awake. ताः They. नक्तम् Night. स्तनंधयः A baby. प्रभूयासुः May be powerful. चिराय For a long time. चिरजीवी Whose life is long. पठ्यासुः May read. इतस्ततः Here and there. कस्य Whose. न Not. उत्कण्ठा Eagerness. दर्शनम् A sight. अस्याः Of this. नृपस्त्री A queen. पायात् May protect. धारिणी Bearer. सुषमा Beauty. अवरोधः Inner apartment. राज्ञी A queen. राजते Looks beautiful. अनुतिष्ठेयुः Must obey. आल्यः Female friends. नियोगः An order. राजसम्मता Appointed by the king. विद्यालयः A school. विशालताम् May look beautiful.

व्या०—अस्मिन् पाठेऽध्यापका इकारान्तस्त्रीलिङ्गशब्दरूपाणि, [1]संबोधनपदानि, [2]आशिषि [3]द्वितीयगणीयधातूनां रूपाणि सन्धौ [4]पूर्वरूपञ्च पाठयेयुश्छात्रान् ।

---

1 एकवचनं संबुद्धिः २।३।४५ संबोधने च २।३।४७। 2 लिङाशिषि ३।४।११६
3 अदिप्रभृतिभ्यः शपः २।४।७२ । 4 एङः पदान्तादति ६।१।१०९।

नवमः पाठः ।

शुक्तिः	भूमिः
पंक्तिः	आलिः
व्याधिः	कान्तिः
खनिः	गतिः
गृष्टिः	तरिः

स्वर्णच्छवी इमे तेऽत्र प्रेजेते अङ्गुलीयिके ।
आददाते प्रदत्तस्तौ साधू एतावहो अलम् ॥
प्रलिहाते इमे गृष्टी प्रेम्णा वत्सौ तयोर्मुहुः ।
एहि मित्र ! अनध्याये क्रीडयामो यथासुखम् ।
जहीहि ३ इमान्येधांसि हविर्धेहि ३ उषर्बुधे ।
अमी ईशा विशालन्ते चक्रि अत्र विलज्जते ॥
भूमिर्जजन्ति रत्नानि खनिभ्यः शोभना मणीः ।
सत्यं जिगाति लोकोऽयं शरीरं व्याधिमन्दिरम् ॥
नदीनां तरिभिर्लोकाः पारं यान्ति प्रयान्ति च ।
प्रायो दृष्टेर्भ्रमाच्छुक्तौ रौप्यं संविभ्रते जनाः ॥

अर्थः—शुक्तिः The mother of pearl. भूमिः Ground पंक्तिः Line. आलिः A female playmate. व्याधिः Disease. कान्तिः Beauty. विधिः Method. गतिः Motion. गृष्टिः A young cow. तरिः A boat. स्वर्णम् Gold. छविः Beauty. इमे These two. प्रेजेते They two beautify. आददाते They two take. प्रदत्तः They two give. अहो Wonder. अलम् Enough. प्रलिहाते They two lick. प्रेम्णा With affection. वत्सः A calf. तयोः Two of them. मुहुः Every now and then. अनध्यायः A holiday. क्रीडयामः We play. यथासुखम् Freely. जहीहि Give up. इमानि These. एधांसि Fire-wood. हविः Ghee. धेहि Pour out. उषर्बुधः The fire. अमी These. ईशाः Kings. विशालन्ते They shine. चक्री God Vishnu. विलज्जते Feels shame. जजन्ति Gives birth. रत्नानि Jewels. शोभना Fine. मणिः A precious stone. सत्यं Truth. जिगाति Speaks. शरीरम् Body. प्रायः Generelly. दृष्टिः Sight. भ्रमः Misapprehension. रौप्यम् Silver. संविभ्रते understands.

व्या०—अस्मिन् पाठेऽध्यापका इकारान्तस्त्रीलिङ्गरूपाणि, [1]तृतीयगणीयधातूनां पठितलकारेषु रूपाणि, [2]प्रकृतिभावविधानञ्च वाक्यविनिमयेन पाठयेयुरिच्छात्रान् ।

---

1 जुहोत्यादिभ्यः श्लुः २।४।७५ । 2 ईदूदेद्द्विवचनं प्रगृह्यम् १।१।११ ओत् १।१।१५ प्लुतप्रगृह्या अचि नित्यम् ६।१।१२५ ईं चाक्रवर्म्मणस्य ६।१।१३० अदसो मात् १।१।११२ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च १।१।१२७ ।

दशमः पाठः

अलाबूः	वेश्मभूः
सुभ्रूः	भ्रूः
बधूः	श्वश्रूः
चमूः	तनूः
प्रसूः	वासूः

धर्म्मो विद्यार्ज्जनं पूर्वं मद्ध्ये शर्म्म धनार्ज्जनम् ।
शर्व्वस्याभ्यर्च्चनश्चान्ते परमैश्वर्य्यलक्षणः ॥
शुष्यत्यन्यसमुत्थानैः खलः पुष्यति सज्जनः ।
तनूषु रोगा जायन्ते सर्व्वेषामेव देहिनाम् ॥
भारते वीरप्रसुवो धार्म्मिक्यः सुभ्रुवोऽभवन् ।
धार्म्मिक्यो गोपिका बद्धः क्षेत्रे कार्य्याणि कुर्व्वते ॥
बधूनामन्तरा श्वश्रूमादरो नाप्यनादरः ।
केचित्क्षुध्यन्ति पुष्यन्ति नश्यन्त्यन्ये च भूतले ॥
मुमुहुर्दुदुहुः केचिच्चम्वां शुशुचिरेऽपरे ।
वेश्मभुवि दिदेवास्यां सीता साकं बधूजनैः ॥

अर्थः—अलाबूः The bottle-guord. वेश्मभूः A palace. सुभ्रूः A beautiful woman. भ्रूः An eyebrow. वधूः A bride. श्वश्रूः A mother-in-law. चमूः An army. तनूः Body. प्रसूः A mother. वासूः A maiden. धर्म्मः Religion. अर्ज्जनम् Earning. पूर्वम् First of all. मध्ये In the middle. शर्म Pleasure. शर्वः The god Shiva. अभ्यर्चनम् Worship. अन्ते At the end. परमैश्वर्यम् Supremacy. शुष्यति Withers. समुत्थानम् Prosperity. खलः A wicked. पुष्यति Nourishes. सज्जनः A good man. जायन्ते They take birth. देही A living being. भारते In India. आर्यिका Worthy. क्षेत्रम् A field. कार्यम् Work. अन्तरा Without. आदरः Respect. अनादरः Insult. क्षुध्यति Feels hungry. नश्यति Perishes. च And. भूतले on the ground. मुमुहुः Became senseless. दुदुहुः Bore malice. शुशुचिरे Regretted. अपरे The other. दिदेव Played. अस्याम् In this.

व्या०—अस्मिन् पाठेऽध्यापका अकारान्तस्त्रीलिङ्गशब्दरूपाणि, [1]चतुर्थ-गणीयधातूनां रूपाणि, [2]लिटः स्वरूपम्, [3]द्वित्वविधेरुदाहरणानि च पाठयेयुश्छात्रान् ।

---

1 दिवादिभ्यः श्यन् ३।१।६९ । 2 परोक्षे लिट् ३।२।११५ । 3 अचो रहाभ्यां द्वे ५।४।४६ । अनचि च ५।४।४७ ।

एकादशः पाठः

धेनुः	सीधुः
कुः	अभीरुः
भ्रमुः	कर्कन्धुः
कण्डुः	रेणुः
हरेणुः	दद्रुः

श्रीकृष्णश्चारयन्धेनूर्गोपालैरवसच्चिरम् ।
शशाम सीधुना खेदश्चचारान्नानि धेनवः ॥
मृत्युष्टटाल सङ्ग्रामे रेणुष्टुटौक अम्बरम् ।
रामश्चिनोति पुष्पाणि हरिश्शीलयते नयम् ॥
ग्रीष्मर्तौ भारतेऽस्माकं रेणुरास्तृणुते पथः ।
पामाकण्डूतिदद्रुभ्यः पिष्टौ वलिरसावलम् ॥
देवदत्तश्शिशोस्तस्याश्चक्षुश्चूर्णैरपूरयत् ।
धुनोति मञ्जरीर्वायुश्चर्वत्याखुः फलोच्चयम् ॥
रामष्षष्ठोऽपि कक्षायाञ्जिगायान्याँस्तु विश्रके ।
रघुवंशेऽकरोट्टीकां मल्लिनाथो महाकविः ॥

अर्थः—धेनुः A cow. सीधुः Wine. कुः The earth. अभीरुः Fearless. भ्रमुः Whirlpool. कर्कन्धुः A kind of fruit. कण्डुः Ecthing. रेणुः Dust. हरेणुः Pease. दद्रुः Herpes. अवसत् Dwelt. चिरम् For a long time. शशाम Became calm. सीधु Liquor. खेदः Exhaution. चचार Ate up. मृत्युः Death. टटाल Wandered. सङ्ग्रामः War. टुटौके Covered. अम्बरम् Sky. चिनोति Collects. शीलयते Studies. नयम् Justice. ग्रीष्मर्तौ In the summar season. आस्तृणुते Spreads. पन्थाः Path. पामा Scale. पिष्टः Powdered. वलिः Sulpher. रसः Mercury. चूर्णम् Powder. अपूरयत् Filled up. धुनोति Shakes. मञ्जरी Blossom. वायुः The wind. चर्वति Chews. आखुः A rat. उच्चयः A heap. षष्ठः Sixth. कक्षायाम् In the class. जिगाय Defeated. विश्रकः A debate. टीका A commentary. महान् Great. कविः A poet.

व्या०—अस्मिन् पाठेऽध्यापका उकारान्तस्त्रीलिङ्गशब्दरूपाणि, पञ्चम-गणीयधातूनां स्वरूपाणि, लिट्[2]-लङ्[3]-लुङां[4] तारतम्यम्, श्नुत्वष्टुत्व[5][6][7]-विध्योरुदाहरणानि च पाठयेयुश्छात्रान् ।

---

1 स्वादिभ्यः श्नुः ३।१।७३ । 2 परोक्षे लिट् ३।२।११५ । 3 अनद्यतने लङ् ३।२।१११ । 4 लुङ् ३।२।११० । 5 स्तोः श्चुना श्चुः । 6 शात् ८।४।४४ । 7 ष्टुना ष्टुः ८।४।४१ ।

द्वादशः पाठः

देवी	कुमारी
घटी	हसन्ती
मञ्जरी	गन्त्री
नारी	राक्षसी
भ्रमरी	शफरी

अचिरादार्चिषुः प्राज्ञाः सरस्वत्याः प्रतिच्छदम् ।
भ्रमर्य्यो मञ्जरीसंघादहार्षुर्मधुरं मधु ॥
ज्वलन्तीषु हसन्तीषु हिमोऽशैत्सीद्विभावसुम् ।
समैषीत्सुन्दरी सीता स्वोपाध्याय्याः प्रसाधनम् ॥
राजन्यः प्राभवज्ज्येष्ठो रामः श्रेष्ठगुणैर्युतः ।
राक्षसीभ्यो बलिं दद्याद्देव्यै दद्याद् महाबलिम् ॥
अचैषीद् मञ्जरी राज्ञः कुमारी निष्कुटादियम् ।
गच्छन्त्यो वृषगन्त्रीभिर्भयान्नार्य्यो व्यधाविषुः ॥
स्वभावेषु कुलस्त्रीणां न चापल्यान्यशोभिषुः ।
असाक्षीत्स्थविरो ब्रह्मा शफरीर्जलजीविनीः ॥

अर्थः—देवी A goddess. कुमारी A maid. घटी A clock. हसन्ती A portable fire place. मञ्जरी A blossom. गन्त्री A cart. नारी A woman. राक्षसी Giantess. भ्रमरी A female bee. शफरी A little fish. अचिरात् Very soon. आर्चिषुः Worshipped. प्राज्ञः A learned man. प्रतिच्छदम् A picture. संघः A heap. अहार्षुः Has stolen. मधुरम् Sweet. ज्वलन्ती Burning हिमः Snow. विभावसुः The fire. समैषीत् Wished. उपाध्यायी A female teacher. प्रसाधनम् Decorating. राजन्यः A prince. ज्येष्ठः An elder. श्रेष्ठः Virtuous. गुणः Virtue. दद्यात् Must give. अचैषीत् collected. निष्कुटः A house garden. वृषगन्त्री A bullock cart. व्यधाविषुः Trembled. स्वभावः Nature. कुलस्त्री A woman of a high family. चापल्यम् Unsteadiness. अशोभिषुः Lookeds plendid. असाक्षीत् Created. स्थविरः Old. ब्रह्मा The creator. जलजीविनी One who lives only in water.

व्या०—अस्मिन् पाठेऽध्यापका ईकारान्तस्त्रीलिङ्गशब्दरूपाणि, [1]षष्ठगणीयधातूनां [2]लुङो रूपाणि, [3]जश्त्वं[4]चर्त्वयोर्लक्ष्याणि च पाठयेयुश्छात्रान् ।

1 तुदादिभ्यः शः ६।१।७७। 2 लुङ् ३।२।११। 3 झलां जशोऽन्ते ५।२।३९। 4 खरि च ५।४।५५ ।

त्रयोदशः पाठः

सुधीः	पपीः
बहुश्रेयसीः	सुतीः
सुखीः	सुश्रीः
फलविक्रीः	धान्यक्रीः
बहुलक्ष्मीः	शुद्धधीः

सुधियः सुश्रियः प्रध्यो बहुलक्ष्मीन् विधिर्जनान् ।
व्यधास्यद्यदि लोकेऽस्मिन् भद्रमभविष्यत्तदा ॥
एकः सुश्रीर्नदीतीरेऽभवन्न्यग्रोधपादपः ।
प्रयत्नैस्तेऽपठिष्यँश्चेदभविष्यन्बुधाश्चिरात् ॥
प्राज्ञान् समगमिष्यामाभविष्याम विचक्षणाः ।
यदि शरद्यरेक्ष्यन्त, नाल यन्त रुजं जनाः ॥
यद्यखेत्स्यन् हि मूर्खास्तान् व्यशेक्ष्यन् सुधियो जनाः ।
नावार्जिष्यद्यदि भ्राता रामोऽभोक्ष्यत कर्कटीम् ॥
सेविष्यसे कृष्णपदारबिन्दं सँल्लप्स्यसे मोक्षसुखं सदातनम् ।
एतन्मुकुन्दस्य विहारभूमिर्बृन्दावनं नाम वनं विराजते ॥

अर्थः—सुधीः A wise man. पपीः The sun. बहुश्रेयसीः One having many good wives. सुतीः One longing for a son. सुखीः One Who is longing for happiness. सुश्रीः Beautiful. फलविक्रीः A fruit seller. धान्यक्रीः One Who buys grain. बहुलक्ष्मीः Having emmense riches. शुद्धधीः A pure-minded. देशः A country. व्यधास्यत् (If) will create. यदि If. लोकेशः The creator भद्रम् Good. तदा Then. एकः One. न्यग्रोधः A Sami tree. प्रयत्नः Perseverance. सुबुद्धिः The wise. समागमिष्यत् (If) will mix in society. विचक्षणः The wise. व्यशेक्ष्यन् Would respect. अखेत्स्यन् Would trouble. इतरे Others. कर्कटी A kind of fruit. सेविष्यसे If thou wilt serve. अरविन्दम् Lotus. संलप्स्यते will get. मोक्षः Salvation. सदातनम् Eternal. मुकुन्दः Krishna. विहारभूमिः Play-ground. विराजते Looks beautiful.

व्या०—अस्मिन् पाठेऽध्यापका ईकारान्तपुल्लिङ्गशब्दानां रूपाणि, सप्तमगणीयधातूनां रूपाणि,[1] [2]लृङः स्वरूपम्, [3]अनुस्वारानुनासिकयोः प्रयोगप्रकारश्चोदाहरणान्तरेभ्यः पाठयेयुश्छात्रान् ।

---

1 रुधादिभ्यः श्नम् ३।१।७५ । 2 लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३८ । 3 यरोऽनुनासिकेऽनुनासिको वा ५।४।४५ । नश्चापदान्तस्य झलि ५।३।२४ । तोर्लि ५।४।६० नश्छव्यप्रशान् ५।३।७ ।

चतुर्दशः पाठः ।

गौः	ग्लौः
नौः	द्यौः
रायः	सेः
सुनौः	प्रद्यौः
सुग्लौः	स्मृतौः

गोषु कारुणिकः कृष्णो गोकुले ता अचारयत् ।
प्रकाशं तनुतेऽत्र ग्लौः शारदे निर्मले दिवि ॥
गवां दुग्धं सदा पथ्यं धारोष्णं कुरुते बलम् ।
वाग्घरिः स बभौ साक्षाद्रामशास्त्री सभागृहे ॥
आदराच्छिशिरे बह्निं सेवन्ते सुभगा जनाः ।
संगच्छन्ते पैरर्वर्णैरज्झीनाः प्रायशो हलः ॥
व्यापारस्य समुत्थानं तेनिरे वणिजो जनाः ।
सिन्धुं व्यापारिणः पोतैः काष्ठनौभिरुदातरन् ॥
तस्येदानीं परं पारं लौहैः पोतैः प्रयान्ति ते ।
दक्षाः कैवर्तकास्तत्र मन्वते सरलान् पथः ॥

अर्थः—गौः A cow. ग्लौः The moon. नौः A boat. द्यौः The sky. रायः Riches. सेः Who goes with love. सुनौः Who has a good boat. प्रद्यौः A bright day. सुग्लौः The night in which the moon shines well. स्मृतौः A love-sick. कारुणिकः Kind. ताः Them. प्रकाशः Light. तनुते spreads. सदा Always. धारोष्णम् Fresh. बलम् Strength. वाग्घरिः The goddess of learning in the form of a lion. सः He. बभौ Looked beautiful. साक्षात् In person. सभा A council. आदरात् Affectionately. शिशिरे In the winter. बह्निः Fire. सुभगः Fortunate. संगच्छन्ते Mix with. वर्णैः A letter. अज्झीनः Without a vowel. प्रायशः Often. हलः The consonents. व्यापारं Business. तेनिरे Spreaded. पोतः A ship. विशारदः Expert. सिन्धुः The sea. व्यापारिणः Merchants. उदातरन् Crossed. लौहः Made of iron. प्रयान्ति Go. दक्षः Skilful. कैवर्तकः A boat-man. मन्वते Indicates. सरलः Easy.

व्या०—अस्मिन् पाठेऽध्यापका ओकारान्तपुल्लिङ्गशब्दानां रूपाणि, [1]अष्टमगणीयधातूनां लकान्तरेषु रूपाणि, वाक्यविनिमयेन [2]पूर्वसवर्णविधेरुदाहरणानि च पाठयेयुरिच्छात्रान् ।

1 तनादिकृञ्भ्य उः । ३।१।७९ । 2 झयो होऽन्यतरस्याम् ५।४।६२ शश्छोऽटि ५।४।६३ ।

पञ्चदशः पाठः ।

ज्ञानम्	दधि
मधु	वर्म्म
धनुः	वारि
जगत्	वाः
नाम	पयः

विना ज्ञानं नराँल्लोके बुधा जानन्ति वानरान् ।
वातपित्तकफान् ग्रीष्मे मृद्नाति मधुरं दधि ॥
गृह्णाति वारिदः क्षारं स्वादु वर्षति पुष्करम् ।
पुनीते गिरिणद्येषा पवित्रैर्निर्मलैर्जलैः ॥
कलिङ्गाः सीधुपाणास्ते युद्धेऽमित्रान् प्रचक्रिरे ।
अक्षौहिणीदलं पार्थो धनुषा केवलोऽदणीत् ॥
पुष्णात्याम्रवणे स्वैरं कोकिलो नाम विष्करः ।
चतुर्णामेव वस्तूनां वृणन्ति साधनं तनुम् ॥
हितं वापीपयो नृणां धारोष्णं च गवां पयः ।
विरञ्चिर्जगतां कर्ता भर्त्तोपेन्द्रो हरो हरः ॥

अर्थः—ज्ञानम् Knowledge. विना Without. नरः A man. लोके In the world. बुधः A wise man. वानरः A monkey. वातः The wind. The पित्तम् Bile. कफः phlegm. मृद्नाति Destroys. गृह्णाति Takes. वारिदः A cloud. क्षारम् Salt. स्वादु Sweet. पुष्करम् Water. पुनीते Purifies. गिरिणदी A river issuing from a hill. निर्मलम् Clean. कलिङ्गः An inhabitant of Kaling. सीधुपाणः A drinker. प्रचक्रिरे Killed. बलम् An army. पार्थः Arjun. धनुः A bow. केवलः Alone. अदृणीत् Killed. पुष्णाति Thrives. आम्रवणम् A garden of mangoes. स्वैरम् Freely. विष्करः A bird. वृणन्ति Choose. साधनम् Means. हितम् Beneficial. वापी A reservoir of water. नृ A man. विरञ्चिः The Creator. जगत् The world. कर्ता Maker. भर्त्ता Protector. उपेन्द्रः Vishnu. हरः God Shiva.

व्या०—अस्मिन् पाठेऽध्यापका नपुंसकलिङ्गशब्दरूपाणि [1]नवमगणीयधातूनां सर्वेषु लकारेषु रूपाणि, [2]णत्वविधानञ्च पाठयेयुश्छात्रान् ।

---

1 क्र्यादिभ्यः श्ना ३।१।५१ । 2 अट्कुप्वाङ्नुम्व्यवायेऽपि ५।४।२ विभाषौषधिवनस्पतिभ्यः ५।४।६ पानं देशे ५।४।९ गिरिनद्यादीनां वा * पूर्वपदात्संज्ञायामगः ५।४।३ ।

षोडशः पाठः ।

पुमान्	विद्वान्
पयोमुक्	अनड्वान्
चन्द्रमाः	युवा
भवान्	करी
वाक्	मनः

पूरन्ति विदुषां वाचः पुंसां चेतांसि पेशलाः ।
विद्वाँल्लिखत्यमेयानि यशांसि परमेष्ठिनः ॥
वायुर्घट्टयते सङ्घान् दूरं व्योम्नि पयोमुचाम् ।
पुण्डरीकः सुतस्तस्य शान्तो दान्तः सुधीः पुमान् ॥
चन्द्रश्चोरयते भानोः प्रकाशं काशते पुनः ।
गुम्फिता गुणमालाभिः पन्थयन्ति महाजनाः ॥
सान्द्रारण्येषु जायन्ते हरीणां करिणां गणाः ।
पयोमुच इवाकाशे वितनन्ति मनोरथाः ॥
राघवस्याश्चितः खड्गः कुण्ठितो वृषले मुनौ ।
व्योम्नि बाधयते राहुः सूर्याचन्द्रमसौ बली ॥

अर्थः—पुमान् A man. विद्वान् A learned man. पयोमुक् A cloud. अनड्वान् A bull. चन्द्रमाः The moon. युवा A young man. भवान् You. करी An elephant. वाक् Speech. मनः Heart. पूरन्ति Fill up. चेतः Heart. पेशला Charming. अमेयम् Immeasurable. यशः Reputation. परमेष्ठी The god Brahma. घट्टयते Brings together. संघः A group. दूरम् Far away. व्योम्नि In the sky. शान्तः Satisfied. दान्तः Retrained. चोरयते Steals away. काशते Shines. पुनः Again. गुम्फितः Decorated. माला A garland. पन्थयन्ति Go by the high-way. सान्द्रम् Dense. हरिः A lion. गणः A group. इव Like. वितनन्ति Extend. मनोरथः A desire. अश्चितः Famous. खड्गः A sword. कुण्ठितः Blunt. वृषलः A Shudra. बाधयते Troubles. राहुः Name of a demon. बली Powerful.

व्या०—अस्मिन् पाठेऽध्यापका हलन्तशब्दानां रूपाणि, [1]दशमगणीयधातूनां रूपाणि, [2]परसवर्णविधेरुदाहरणानि च शिक्षयेयुश्छात्रान् ।

---

1 सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।२५ णिचश्च १।३।७४ । 2 अनुस्वारस्य ययि परसवर्णः ८।४।५८ वा पदान्तस्य ८।४।५९ ।

षोडशः पाठः ।

पुमान्	विद्वान्
पयोमुक्	अनड्वान्
चन्द्रमाः	युवा
भवान्	करी
वाक्	मनः

पूरन्ति विदुषां वाचः पुंसां चेतांसि पेशलाः ।
विद्वाँल्लिखत्यमेयानि यशांसि परमेष्ठिनः ॥
वायुर्घट्टयते सङ्घान् दूरं व्योम्नि पयोमुचाम् ।
पुण्डरीकः सुतस्तस्य शान्तो दान्तः सुधीः पुमान् ॥
चन्द्रश्चोरयते भानोः प्रकाशं काशते पुनः ।
गुम्फिता गुणमालाभिः पन्थयन्ति महाजनाः ॥
सान्द्रारण्येषु जायन्ते हरीणां करिणां गणाः ।
पयोमुच इवाकाशे वितनन्ति मनोरथाः ॥
राघवस्याञ्चितः खड्गः कुण्ठितो वृषले मुनौ ।
व्योम्नि बाधयते राहुः सूर्याचन्द्रमसौ बली ॥

अर्थः—पुमान् A man. विद्वान् A learned man. पयोमुक् A cloud. अनड्वान् A bull. चन्द्रमाः The moon. युवा A young man. भवान् You. करी An elephant. वाक् Speech. मनः Heart. पूरन्ति Fill up. चेतः Heart. पेशला Charming. अमेयम् Immeasurable. यशः Reputation. परमेष्ठी The god Brahma. घट्टयते Brings together. संघः A group. दूरम् Far away. व्योम्नि In the sky. काशते Shines. पुनः Again. Satisfied. दान्तः Retrained. चोरयते Steals away. गुम्फितः Decorated. माला A garland. पन्थयन्ति Go by the high-way. सान्द्रम् Dense. हरिः A lion. गणः A group. इव Like. वितनन्ति Extend. मनोरथः A desire. अञ्चितः Famous. खड्गः A sword. कुण्ठितः Blunt. वृषलः A Shudra. बाधयते Troubles. राहुः Name of a demon. बली Powerful.

व्या०—अस्मिन् पाठेऽध्यापका हलन्तशब्दानां रूपाणि, [1]दशगणीय-धातूनां रूपाणि, [2]परसवर्णविधेरुदाहरणानि च शिक्षयेयुरध्यापकाः ।

1 सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।७४ । 2 अनुस्वारस्य ययि परसवर्णः ८।४।५८ वा

सप्तदशः पाठः ।

प्रभवति	पराभवति
अनुकरोति	आक्रमते
प्रहरति	संहरति
प्रादुर्भवति	विजयते
निषेधति	सञ्जायते

श्रीनाथो विजयतेऽसौ यः पराजयतेऽसुरान् ।
काकमुत्कुरुते श्येनो विरमत्यशनाच्छुकः ॥
बोधयत्यरुणः पद्मं नाशयति घोरं तमः ।
महीं भुञ्जन्ति राजान ओदनं भुञ्जते जनाः ॥
आक्रमतेऽनन्ताद्धंसः, साधु विक्रमते हयः ।
व्याददाति मुखं व्याघ्रः, पाठाच्छिष्या विकुर्वते ॥
अश्वैः सञ्चरते सेना, धर्म्ममुच्चरते खलः ।
दर्शयन्ति भवं भक्ता, बको वञ्चयते झषान् ॥
यमुना स्यन्दते वेगैर्मेघो गर्जति वर्षति ।
नवोत्थानं ज्वरव्यांघेश्चिरेणोत्तम्भते भिषक् ॥

अर्थः—प्रभवति Becomes powerful. पराभवति Defeats. अनुकरोति Imitates. प्रहरति Strikes at. संहरति Gathers together. प्रादुर्भवति Appears. विजयते Wins. निषेधति Refuses. सञ्जायते Comes to light. श्रीनाथः God Vishnu. विजयते Conquers. यः Who. पराजयते Defeats. सुरः A god. काकः A crow. उत्कुरुते Tears up. श्येनः A hawk. विरमति Stops. आहारः Food. शुकः A parrot. बोधयति Revives. अरुणः The sun. पद्मम् Lotus. तमः Darkness. महीं The Earth. भुञ्जन्ति Enjoy. भुञ्जते Eat. आक्रमते Comes on. अनन्तः The sky. हंसः A swan. साधु Excellently. विक्रमते walks. हयः A horse. व्याददाति Opens. मुखं The mouth. व्याघ्रः A tiger. विकुर्वते Confuses. सञ्चरते Goes with. उच्चरते Attacks. भवः The god Shanker. बकः A crane. वञ्चयते Cheats. झषः A fish. स्यन्दते Flows up. ज्वरः Fever.

व्या०—अस्मिन् पाठेऽध्यापका [1]उपसर्गाणां प्रयोगविधानम्, [2]परस्मैपदात्मनेपदयोः प्रपञ्चम्, 'उदः स्थास्तम्भोः पूर्वस्य' इयो होऽन्यतरस्याम् 'शदृछोटि' इत्येतेषां सूत्राणां लक्ष्याणि च पाठयेयुश्छात्रान्।

---

1 उपसर्गाः क्रियायोगे १।४।५८ ते प्राग्धातोः १।४।८०। 2 अनुदात्तङित आत्मनेपदम् १।३।१२ विपराभ्यां जेः १।३।१९ आङ उद्गमने १।३।४० वेः पादविहरणे १।३।४० उदश्वरः सकर्मकात् १।३।५३ समस्तृतीयायुक्तात् १।३।५४ भुजोऽनवने १।३।६६ णेरणौ यत्कर्मणौ चेत् स कर्ताऽनाध्याने १।३।६७ गृधिवञ्चयोः प्रलम्भने १।३।६९ अनुपराभ्यां कृञः १।३।७८ व्याङ्परिभ्यो रमः १।३।८३।

अष्टादशः पाठः।

अहम्	त्वम्
सः	यः
एषः	अयम्
असौ	सर्वः
अन्यः	उभयः
एकः	द्वौ

चक्रिँस्त्रायस्व पापेभ्यस्तारयस्व भवार्णवात्।
असौ पुँस्कोकिलोऽरण्ये मञ्जु कूजति पञ्चमम्॥
किँह्यः पर्व्वणि गोविन्दं प्रयागं गमयिष्यति?।
किं ह्लादयन्ति चेतांसि चक्षुर्भिस्त्वा प्रपश्यताम्?॥
भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्।
श्रीशस्त्वाऽवतु मापीह दत्तात्ते मेऽपि शर्म्म सः॥
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः।
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः॥
कुँक्कुरो बुक्कते मार्गे पुंगजः साचि पन्थति।
शिशुत्वे विधिना दत्तस्सँस्कारो नान्यथा भवेत्॥

अर्थः—अहम् I. त्वम् You. सः He. यः Who. एषः This. असौ This. सर्वः All. अन्यः Another. उभयः Both. एकः One. द्वौ Two. चक्री God Vishnu. त्रायस्व Protect. पापः Sin. तारयस्व Carry over. भवः The world. अर्णवः The sea. पुंस्कोकिलः A male cuckoo. पाठयति Teaches. ह्यः To-morrow. पर्व्वः Holiday.

गमयिष्यति Will send. किम् Why. ह्लादयति Pleases. चक्षुः An eye. प्रपश्यताम् Of the seers त्रायते Saves. ईशः God. इह In this world. दत्तात् May give. शर्म्म The good. नौ To us. अव्यात् Save. वः To you. नः To us. नः Of us. सेव्यः Serviceable. अत्र Here in this world. कुक्कुरः A dog. वुक्कते Barks. मार्गे In the way. युगजः A male elephant. साचि Crookedly. पन्थति Walks. शिशुत्वे In child-hood. विधिना According to the method. संस्कारः Purity.

व्या०—अस्मिन् पाठेऽध्यापकाः सर्वनामशब्दरूपाणि, [1]णिजन्तपदानि, [2]"संपुंकानाम्" [3]मकारप्रपञ्चश्चावगमयेयुश्छात्रान्।

1 हेतुमति च ३।१।२६ नश्छव्यप्रशान् ८।३।७। 2 पुमः खय्यम्परे ८।३।६। 3 हे मपरे वा ८।३।२६ यवलपरे यवला वेति वक्तव्यम्।

एकोनविंशः पाठः।

लेखनी।



रामचन्द्रः—इदं किं वर्तते मित्र भवतो दक्षिणे करे ?
देवेन्द्रः—इयम्मे लेखनी विद्वन्! संह्लादयति मे मनः॥
रा०—सम्राजते भवानद्य किं करोत्यनयाऽधुना ?।
दे०—किँ ह्येनया न जानासि ? लिखन्ति पण्डिता जनाः॥
रा०—क्व लब्धेयं त्वया चारु-लेखनी केन सँस्कृता ?।
दे०—सँस्कृता शिल्पकारेण विपण्याँल्लभ्यतेऽधुना॥

रा०–तीक्ष्णाग्रं किमिदञ्चास्याः प्रान्तभागे सुशोभते ? ।
दे०–अपीदं त्वं न जानासि ? लेखनीमुखमुच्यते ॥
रा०–अन्यापि वर्तते काचिल्लेखन्येतादृशी सखे ? ।
दे०–वाढम्, वामेऽपि हस्तेऽसौ द्वितीयास्ति मनोहरा ॥
रा०–कान्तेयं लेखनी मित्र ! क्षणं देहि लिखाम्यहम् ।
दे०–नो, पश्यतु भवान् दूरान्नाधुना लिख्यतेऽनया ॥
रा०–कस्माद्धेतोः, न विद्वाँसो लिखन्त्येताभिरुत्तमम् ? ।
दे०–(तथापि) लेखनी पुस्तकं भार्या नाऽपरस्मै प्रदीयते ॥
रा०–विद्वँल्लिखात्र लेखन्या यशांसि परमेष्ठिनः ।
दे०–श्रीमन् ! लिखामि सौख्येन दर्शयाम्यात्मसौष्ठवम् ॥

लेखनी विदुषां हस्ते श्रयति दीव्यति गीर्यति ।
सैषा पामरहस्तेषु क्लीबते चोन्मनायते ॥

अर्थः—लेखनी A pen. वर्तते Is. भवतः Your. करः A hand. दक्षिणः Right. इयम् This. मे Mine. विद्वान् A learned man. संह्लादयति Pleases. सम्राजते Looks beautiful. भवान् You. अद्य To-day. अनया With this. अधुना Now. एतया With this. जानासि (Thou) knowest. विबुधः A wise man. क्व Where. लब्धा Obtained. संस्कृता Made of. शिल्पकारः An artison. विपणिः A market. तीक्ष्णम् Sharp. अग्रम् A point. प्रान्तभागः An end. सुशोभते Looks beautifnl. लेखनीमुखम् A nib. काचित् Any. एतादृशी Like this. वाढम् Yes. वामः Left. मनोहरा Beautiful. कान्ता Beautiful. क्षणम् A moment. हेतुः A reason. उत्तमः The best. भार्या A wife. परस्मै For another. सौख्येन With pleasuse. सौष्ठवम् Skil fulness.

व्या०—अस्मिन् पाठेऽध्यापकाः [1]पदान्तनकारमकारयोरनुनासिकानुस्वारविधानम्, [2]नामधातुप्रपञ्चश्चावगमयेयुश्छात्रान् ।

---

1 सुप आत्मनः क्यच् ३।१।८ उपमानादाचारे ३।१।१०। 2 मो राजि समः क्वौ ८।२।३५ समः सुटि ८।३।५ अत्रानुनासिकः पूर्वस्य तु वा ८।३।२ अनुनासिकात्परोऽनुस्वारः ८।३।४ विसर्जनीयस्य सः ८।३।३४ संपुंकानां सो वक्तव्यः ।

गमयिष्यति Will send. किम् Why. ह्लादयति Pleases. चक्षुः An eye. प्रपश्यताम् Of the seers त्रायते Saves. ईशः God. इह In this world. दत्तात् May give. शर्म्म The good. नौ To us. अव्यात् Save. वः To you. नः To us. नः Of us. सेव्यः Serviceable. अत्र Here in this world. कुक्कुरः A dog. बुक्कते Barks. मार्गे In the way. पुंगजः A male elephant. साचि Crookedly. पन्थति Walks. शिशुत्वे In child-hood. विधिना According to the method. संस्कारः Purity.

व्या०—अस्मिन् पाठेऽध्यापकाः सर्वनामशब्दरूपाणि, [1]णिजन्तपदानि, [2]"संपुंकानाम्" [3]मकारप्रपञ्चश्चावगमयेयुश्छात्रान् ।

1 हेतुमति च ३।१।२६ नश्छव्यप्रशान् ८।३।७ । 2 पुमः खय्यम्परे ८।३।६ । 3 हे मपरे वा ८।३।२६ यवलपरे यवला वेति वक्तव्यम् ।

एकोनविंशः पाठः ।

लेखनी ।



रामचन्द्रः—इदं किं वर्तते मित्र भवतो दक्षिणे करे ?
देवेन्द्रः—इयम्मे लेखनी विद्वन् ! संह्लादयति मे मनः ॥
रा०—सम्राजते भवानद्य किं करोत्यनयाऽधुना ? ।
दे०—किँ ह्येनया न जानासि ? लिखन्ति पण्डिता जनाः ॥
रा०—क्व लब्धेयं त्वया चारु-लेखनी केन सँस्कृता ? ।
दे०—सँस्कृता शिल्पकारेण विपण्याँल्लभ्यतेऽधुना ॥

रा०–तीक्ष्णाग्रं किमिदञ्चास्याः प्रान्तभागे सुशोभते ? ।
दे०–अपीदं त्वं न जानासि ? लेखनीमुखमुच्यते ॥
रा०–अन्यापि वर्तते काचिल्लेखन्येतादृशी सखे ? ।
दे०–वाढम्, वामेऽपि हस्तेऽसौ द्वितीयास्ति मनोहरा ॥
रा०–कान्तेयं लेखनी मित्र ! क्षणं देहि लिखाम्यहम् ।
दे०–नो, पश्यतु भवान् दूरान्नाधुना लिख्यतेऽनया ॥
रा०–कस्माद्धेतोः, न विद्वाँसो लिखन्त्येताभिरुत्तमम् ? ।
दे०–(तथापि) लेखनी पुस्तकं भार्या नाऽपरस्मै प्रदीयते ॥
रा०–विद्वँल्लिखात्र लेखन्या यशांसि परमेष्ठिनः ।
दे०–श्रीमन् ! लिखामि सौख्येन दर्शयाम्यात्मसौष्ठवम् ॥

लेखनी विदुषां हस्ते श्रयति दीव्यति गीर्यति ।
सैषा पामरहस्तेषु क्लीबते चोन्मनायते ॥

अर्थः—लेखनी A pen. वर्तते Is. भवतः Your. करः A hand. दक्षिणः Right. इयम् This. मे Mine. विद्वान् A learned man. संह्लादयति Pleases. सम्राजते Looks beautiful. भवान् You. अद्य To-day. अनया With this. अधुना Now. एतया With this. जानासि (Thou) knowest. विबुधः A wise man. क्व Where. लब्धा Obtained. संस्कृता Made of. शिल्पकारः An artison. विपणिः A market. तीक्ष्णम् Sharp. अग्रम् A point. प्रान्तभागः An end. सुशोभते Looks beautifnl. लेखनीमुखम् A nib. काचित् Any. एतादृशी Like this. वाढम् Yes. वामः Left. मनोहरा Beautiful. कान्ता Beautiful. क्षणम् A moment. हेतुः A reason. उत्तमः The best. भार्या A wife. परस्मै For another. सौख्येन With pleasuse. सौष्ठवम् Skilfulness.

व्या०—अस्मिन् पाठेऽध्यापकाः [1]पदान्तनकारमकारयोरनुनासिकानुस्वारविधानम्, [2]नामधातुप्रपञ्चश्चावगमयेयुश्छात्रान् ।

---

1 सुप आत्मनः क्यच् ३।१।८ उपमानादाचारे ३।१।१०। 2 मो राजि समः क्वौ ८।२।३५ समः सुटि ८।३।५ अत्रानुनासिकः पूर्वस्य तु वा ८।३।२ अनुनासिकात्परोऽनुस्वारः ८।३।४ विसर्जनीयस्य सः ८।३।३४ संपुंकानां सो वक्तव्यः ।

विंशः पाठः ।

पुस्तकम् ।

यज्ञदत्तः–पुस्तकानि कियन्त्यत्र ? गणयन्तु महाशयाः ।
देवदत्तः–एकं द्वे त्रीणि चत्वारि पञ्चषट्सन्ति भोः सखे ! ॥
य०–सप्तमं पुस्तकं कस्य तदीप्सामि सुहृद्वर ! ।
दे०–तदिदं रामदत्तस्य कौमुदीपुस्तकं नवम् ॥
य०–द्रव्येणावरणञ्चास्य केन बद्धं मनोहरम् ? ।
दे०–शम्भुदत्तेन वस्त्रेण निर्मितं पुटबन्धनम् ॥
य०–कस्येमानि नवीनानि पुस्तकान्यत्र सन्ति भो ? ।
दे०–नवाच्युतस्य चत्वारि शम्भुदत्तस्य मे दश ॥
य०–पुस्तकानि पठन्नास्ते बालः सञ्छम्भुरप्यसौ ! ।
दे०–प्रत्यङ्डात्मास्य जानाति को लाभः पठनाद्भवेत् ? ॥
य०–प्राङ् षष्ठः स तु कक्षायां प्राथम्यं प्रयियासति ।
दे०–कोऽत्र मित्र ! लिखन्नासीत् प्राग्ग्रन्थानुत्तमोत्तमान् ? ॥
य०–देश्या लिलिखिषन्ति स्म मुनयः शास्त्रकोविदाः ।
दे०–कस्को रमेशदत्तस्य पुस्तके विषयोऽङ्कितः ? ॥
य०–शब्दा धातुस्वरूपाणि सन्धयः कारकाण्यपि ।
दे०–कृत्तद्धितसमासास्तु संक्षेपेण प्रपञ्चिताः ॥
य०–कतिथं पिपठिषसि पाठमाधेहि पुस्तकम् ? ।
दे०–पाठं, सुगण् षोडशकं, पिपृक्षामि निबोधय ॥

पुस्तकं लेखनी भार्या परहस्ते न दीयताम् ।
दत्ताः खलु निवर्त्तन्ते नष्टं भ्रष्टा च खण्डिता ॥

अर्थः—कियन्ति How many. गणयन्तु Count. महाशयः A great person. एकम् One. द्वे Two. त्रीणि Three. चत्वारि Four. पञ्च Five. षट् Six. सप्त Seven. अष्टौ Eight. नव Nine. दश Ten. ईप्सामि I want. नवम् New. आवरणम् A cover. द्रव्यम् Material. बद्धम् Bound. वस्त्रम् A cloth. निर्मितम् Made of. प्रत्यङ्गात्मा The soul. बालः A child. लाभः Advantage. प्राक् Before. षष्ठः Sixth. कक्षा A class. प्रयियासति Wishes to go. आसीत् Had been. ग्रन्थः A work. देश्याः The country-men. कोविदः A learned man. विषयः A subject. अङ्कितः Has been written. संक्षेपेण Briefly. सुगण् A learned person. षोडशकम् Sixteenth. पिपृक्षामि I wish to ask. निबोधय Please explain. खलु Doubtlessly. निवर्तन्ते Come back. भ्रष्टा Spoiled.

व्या०—अस्मिन् पाठेऽध्यापकास्तुक्[1]-कुक्-टुक्-धुट्-ङ्युटां प्रपञ्चम्, [2]सन्नन्तपदानि, संख्यावाचकानि चोदाहरणान्तरेभ्यश्च शिक्षयेयुश्छात्रान् ।

---

1 शितुक् ८।३।३१ ङ्णोः कुक् टुक् शरि ८।३।२८ चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् । डः सि धुट् ८।३।२९ कस्कादिषु च ८।३।४८। 2 गुप्तिज्किद्भ्यः सन् ३।१।५ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ३।१।६ धातोः कर्मणः समानकर्तृकादिच्छायां वा ३।१।७ ।

एकविंशः पाठः ।

शिरस्त्राणम् ।



श्रीकृष्णः—अभितः किमिदं राम ! मूर्द्धि शोशुभ्यते तव ?
रामः—शिरस्त्राणमिदं नूनं ! मह्यं रोरुच्यते सखे !

श्री०—उच्चैः शिरस्पदं धत्त इदं निर्माति को भुवि ?
रा०—स्वयमाविष्कृतैस्तूलैर्ग्राम्यो वेवीयते जनः ।
श्री०—कच्चित्ते वर्तते सौत्रमौर्णं वापि शिरस्त्रकम् ?
रा०—नूनमस्ति ममाप्यौर्णं प्रगे पित्रा पुरस्कृतम् ।
श्री०—नैजं देहि शिरस्त्राणं यामि सायं गृहान्तरम् ।
रा०—अधुनाऽसाम्प्रतं प्रश्नः परेद्युरहमानये ॥
श्री०—जाजायते प्रचारोऽस्य किंश्लोके न चिरन्तनः ?
रा०—नूनमस्य प्रचारोऽभूद्भुवनेष्वखिलेष्वपि ॥
मुकुटं भूभृतामासीच्छीर्षण्यं युद्ध्यतामिदम् ।
श्री०—किरीटं किन्नु देवानां शीर्षण्यस्य क्रमान्तरम् ? ॥
रा०—कृष्णस्तत्रभवान् बाढं बार्हं धत्ते किरीटकम् ।
श्री०—शीर्षण्यं संगृहीष्येऽतो महर्घश्चाप्तिसुन्दरम् ॥
कौतस्कुतं कियन्मूल्येनेदं कुत्रोपलभ्यते ?
रा०—देशीयं रूप्यकेणेदमापणाल्लभ्यते खलु ॥
श्री०—बोभूयते गृहं गन्तुमकालः प्रणमाम्यहं ।
रा०—श्रीमन्नमस्करोमि त्वामहमप्येमि स्वं गृहम् ॥
शीतातपशरारुद्विड्धारासंपातरक्षणम् ।
शिरस्त्राणमिदं तस्मात् पुंभिः शिरसि धार्य्यते ॥

अर्थः—शिरस्त्राणम् A cap. अभितः On all sides. मूर्ध्नि Upon the head. शोभ्यते Looks very beautiful. मह्यम् For me. रोरुच्यते Pleases very much. रम्यम् very fine. उच्चैः Highly. धत्ते Deserves. स्वयम् Oneself. आविष्कृतः Produced. तूलम् Cotton. ग्राम्यः A villager. वेवीयते Weaves often. कच्चित् A particle of Interrogation सौत्रम् Made of yarn. और्णम् Made of wool. नूनम् Surely. प्रगे In the morning. पुरस्कृतम् Rewarded. नैजम् One's own. यामि I go. सायम् Evening. असाम्प्रतम् Improper. प्रश्नः A question. परेद्युः On the third day. जाजायते Frequently takes place. प्रचारः An use. भुवनम् The world. अखिलः All. मुकुटम् Crown. भूभृत् A king. युध्यताम् Of the fighters. क्रमान्तरम् Another kind. बाढम् Surely. बार्हम् Made of peacock feathers. संगृहीष्ये Will store up. कियत् How much. अवक्रयः Price. आपणम् A market. बोभूयते Becomes frequently. अकालः Late. प्रणमामि I bow. एमि I go. शीतम् Cold. आतपः The heat of the sun. शरारुः Killer. द्विट् Enemy. धारा A Shower. संपातः A fall. धार्यते Is put.

व्या०—अस्मिन् पाठेऽध्यापका अव्ययानां[1] स्वरूपम्, [2]यङन्तप्रक्रियाम्, [3]शषसानां प्रपञ्चञ्चावगमयेयुश्छात्रान् ।

1 स्वरादिनिपातमव्ययम् १।१।३७। कृन्मेजन्तः १।१।३९। क्त्वातोसुन्कसुनः १।१।४०। अव्ययादाप्सुपः २।४।८२। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥ 2 धातोरेकाचो हलादेः क्रियासमभिहारे यङ ३।१।२२। सन्यङोः ६।१।९। 3 आदेशप्रत्यययोः ८।३।५९ ।

द्वाविंशः पाठः ।

अश्वः ।



छात्राः ! अश्वं पश्यत । कीदृक् सुन्दराकृतिरयं पशुः । आयते वर्तुले च चक्षुषी नातिलम्बश्च वक्त्रम् । अस्य श्रोत्रे नातिदीर्घे समुत्थिते च भवतः । तयोरन्तराले शोभना शिखा वर्वर्ति । लम्बास्य ग्रीवा च वेवेत्ति । स्कन्धदेशे या बालपङ्क्तिर्वरीवर्ति, ताम् "आलम्" इति वावचीति जनः ।

अयमेकशफश्चतुष्पाच्च भवति, चामराकृति पुच्छञ्चास्य शोभां विशिनष्टि । अस्य जातौ नाना भेदा वर्धतति । चित्रेऽत्रायमारोढुं

सज्जीकृतोऽश्वपेन वाजी। अस्य पृष्ठे पर्य्याणं निहितमस्ति। मुखे च कविका। कविकायां रश्मिर्वेविदीति याश्चाश्ववारो हस्ताभ्यां दाधाति। अश्वो बलवान् बोभवीति। अयं वेगेन दाधावीति। आखेटके संग्रामे चायं महोपयोगी बोभोति। अश्वो गत्रीं चर्कृषीति। भारान् वावहीति। अश्ववारान्नेनयीति। पाश्चात्यदेशेषु हलमपि चर्कृषीति। भारवाहकं लघुघोटकं पृष्ठ्यं वावचीति लोकः।

अश्वानामशनं घासोऽस्ति। चणकान् घृतं गुडञ्चाप्येते ससौरूयं चाखादन्ति। एष उष्ट्र इव रोमन्थं न वर्वृतीति।

अश्वा मनुष्याणां परमोपयोगिनो बोभुवति। पालिताः प्रेप्रीणन्ति सेस्निहन्ति च कृते स्वामिनः। सुदक्षाः सम्यगुपात्तगतिसंस्कारा मनुष्याणां मित्रवद्धिताचरणा जाजन्ति।

रङ्गभूमौ विनीता अश्वा नाना साश्चर्यचर्य्याऽखेलाऽ प्रदर्शयन्ति। अयं स्वामिनो जीविकाकरः प्रबोभवीति।

अश्वो मित्रं गजो मित्रं वृषो मित्रं गवां पतिः।
श्वा मित्रं सुलभो यस्या नृजातिः सा नवोदया॥

अर्थः—अश्वः A horse. कीदृक् Of what sort. आयतम् Long. वर्तुलम् Round नातिलम्बम् Short. वक्त्रम् The mouth. श्रोत्रम् The ears. नातिदीर्घम् Not very long. अन्तराले In the middle. शिखा The tuft of hair. ग्रीवा The neck. स्कन्धः The shoulder. आलम् The mane. वावचीति Frequently speaks. एकशफः One-hoofed विशिनष्टि Increases. नाना Numerous. भेदः Verity. आरोढुम् For riding. सज्जीकृतः Made ready. वाजी A horse. पर्याणम् A saddle. निहितम् Put on. कविका A rein. रश्मिः A string. अश्ववारः A horse-man. दाधाति Holds up tightly. बलवान् Strong. आखेटः Hunting. उपयोगी Useful. दाधावीति Runs very fast. वावहीति Frequently carries. नेनयीति Frequently carries. चणकः Gram. चाखादति Frequently eats. रोमन्थः Ruminating. पालितः Tamed. जाजन्ति Frequently becomes. सेस्निहन्ति Frequently love. कृते For. स्वामी A master. रङ्गभूमिः A theatre. श्वा A dog. नृजातिः The human race. नवोदया Lucky.

व्या०—अस्मिन् पाठेऽध्यापकाः पदान्तापदान्तनकारमकारयोः प्रप-
श्नम्, यङ्लुगन्तप्रक्रियाया दिग्दर्शनञ्च कारयेयुरिच्छात्रान्।

---

1 मोऽनुस्वारः ८।३।२३ नश्चापदान्तस्य झलि ८।३।२४ अनुस्वारस्य ययि परसवर्णः ८।४।५८ वा पदान्तस्य ८।४।५९। 2 धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२ यङोऽचि च २।४।२४।

त्रयोविंशः पाठः ।

दिक्चक्रम् ।



प्राची प्रतीच्युदीच्यवाची चेति चतस्रो मुख्या दिशो बहुधा जनैर्ज्ञायन्ते । यस्यां दिशि भानुरुदेति सा प्राची । यस्याश्चास्तमेति सा प्रतीचीत्युच्यते ।

सूर्य्योदये यूयं यदि च्छायापतेः सम्मुखीना अस्थास्यत तर्हि युष्माकं सम्मुखे प्राची पूर्वा वा दिगभविष्यत, पृष्ठे प्रतीची पश्चिमा वा, वामहस्तयुदीच्युत्तरा वा, दक्षिणपार्श्वे चावाची दक्षिणा वा दिक् ।

इदानीन्तनैर्वैज्ञानिकैर्दिशान्निश्चेतारो नवीनाः सरला अप्युपाया आविष्क्रियन्ते ।

ध्रुवयन्त्रेण प्रागुदीची दिङ्निश्चीयते । ततः क्रमेण शेषा अपि सुनिश्चिता जायन्ते दिशः । यन्त्रमिदं मेरुं लक्ष्यीकृत्य निर्मितं जायते, येन सर्वेषामपि वर्षाणामुत्तरस्यां दिशि स्थीयते ।

अन्या अपि चतस्रः काष्ठा भवन्ति । ता उपदिशः कथ्यन्ते । तथाहि–पूर्वोत्तरस्यामैशानी, उत्तरपश्चिमायां वायवी, पश्चिमदक्षिणस्यां नैर्ऋती, दक्षिणपूर्वायाश्चाग्नेयी दिग् भवति । उपरितन्यधस्तनी चापि दिशौ स्तः । एवञ्च दश दिशो गण्यन्ते ।

सायंत्रिकैः पोतयात्रिभिश्च ध्रुवयन्त्रेण दिशो ज्ञायन्ते । यतः पारावारेषु च्छायया सूर्योदयेन वा दिग्ज्ञानं न शक्यते कर्त्तुम् । अधुनातनैस्तु पाठशालाच्छात्रैरपि दिग्ज्ञानं सम्पाद्यते । तद्धि युज्यते । यतो हि दिशमुद्दिश्य प्राणिनां गतयः प्रवर्तन्ते । न केनापि दिग्ज्ञानमन्तरा प्रस्थीयते ।

पूर्वोदयाचलस्था दिक् पश्चिमास्ताचलस्थिता ।
मेरुसन्निहितोदीची दक्षिणा मेरुसम्मुखा ॥

अर्थः—दिक् Direction. चक्रम् A circle. प्राची The east. प्रतीची The west. उदीची The north. अवाची The south. चतस्रः Four. मुख्या The main. बहुधा Often. उदेति Rises. अस्तमेति Sets. सूर्योदये At The rise of the sun. छायापतिः The sun. सम्मुखीनः In The front of. पृष्ठः The back. पार्श्वम् Side इदानीन्तनः Modern. वैज्ञानिकः A scientist. निश्चेतारः Those who ascertain. नवीनः New. सरलः Easy. उपायाः The means. आविष्क्रियन्ते Are invented. ध्रुवयन्त्रम् A compass. क्रमेण In order. शेषः The remainder. सुनिश्चितः Settled. लक्ष्यीकृत्य Having kept in veiw. वर्षः A continent. काष्ठा A direction. उपदिशः Subdirections. सायंत्रिकः A sailor. पोतः A ship. यात्री A Traveller. पारावारः The sea. छाया Shadow. उदयाचलः The name of a mountain. अस्ताचलः The name of a mountain. मेरुः The name of a mountain.

व्या०—अस्मिन् पाठेऽध्यापकास्तुग्विधानम्[1], भावकर्म्मप्रक्रियायाश्च[2] दिग्दर्शनं कारयेयुश्छात्रान् ।

---

1 छे च ६।१।७३। पदान्ताद्वा ६।१।७६ । २ भावकर्मणोः १।३।१३ सार्वधातुके यक् ३।१।६७ ।

चतुर्विंशः पाठः ।

घटीयन्त्रम् ।



इदं घटी यन्त्रमस्ति । अनेन समयविभागो जायते । पुरा सूर्य्यगत्यातपघटीयन्त्रेण वा समयो निश्चीयते स्म । अधुनानेन यन्त्रेणानायासं कालविभागो निरूप्यते जनैः ।

यत्रस्यास्य सम्मुखीना भवन्तु पश्यन्तु चात्र परिधिद्वयम्। उभयत्रापि गणनाङ्का अङ्किताः सन्ति। एकत्रैकतो द्वादशान्तम्, अन्यत्र च दशकक्रमेण षष्टिं यावत्। महति परिधौ षष्टिर्नीलीचिह्नानि वर्तन्ते। लघुपरिधौ च द्वादशैव सन्ति। तानि क्रमेण लिप्तिका घण्टाश्च प्रदिशन्ति। घटिकायामस्यामन्यान्यपि त्रीणि मेचकवस्तूनि जङ्गमानि विद्यन्ते। तानि सूचिका आहुः। यातिलघ्वी लघुपरिधौ रेखासु समन्ततो धावते सा प्रतिलिप्तिकाप्रदेशिनी कथ्यते। या चायता सूचिका दीर्घे परिधौ शनैः शनैर्व्यवस्थितया मुद्रया संचरते सा लिप्तिका निर्दिशति। अपरा च या सुस्थिरेव प्रतिभाति सा घण्टाप्रदेशिनी कथ्यते।

अहरहो द्वादश घण्टा वाद्यन्ते। अहोरात्रे च चतुर्विंशतिः। अहर्गणैर्मासा भवन्ति। वैर्वार्षणि। तैश्च युगानि। प्रातष्षड्वादनसमये पूर्वस्यां दिशि भानू राजते, जायते च तेन दिनम्। पुना रात्रिश्चायाति तस्यां विधू रज्यते।

पुरा सूर्याचन्द्रमोभ्यां समयविभागो बभूव। माधवोऽयं घटीं रक्षति। एषोऽनया समयविभागं वेत्ति। अयं यथा समयं स्वकार्य्याणि निर्वर्त्तयते। वृथा समयं न गमयति।

समये स्वपतां जाग्रताञ्चाधो याति, भगो वर्द्धते, बुद्धिः समेधते, नीरोगता च जायते। युष्माभिरपि घटी रक्षणीया। महोपयोगि यत्रमिदम्। छात्राणामध्यापकानां विदुषाञ्च घटीमन्तरा न चलति कार्यम्।

प्रथमायां घटी स्तौति घटिकायां कर्त्तव्यताम्।
सम्प्राप्तायां द्वितीयायां न जाने किं घटिष्यते॥

अर्थः—घटीयत्रम् A watch. समयः The time. विभागः Division. आतपः The sun-light. निश्चीयतेस्म Decided. अनायासम् Without exertion. कालः The time. सम्मुखीनः In front of. परिधिः A circle. उभयत्र At the both ends. एकत्र In one place. दशककमेण In the series of ten. षष्टिः Sixty. घण्टा An hour. नीली Black. जंगमानि Running. प्रदिशन्ति Point out. सूचिका A hand of a watch. समन्ततः On all sides. धावते Runs. व्यवस्थिता Steady. मुद्रा Position.

यत्रस्यास्य सम्मुखीना भवन्तु पश्यन्तु चात्र परिधिद्वयम्। उभयत्रापि गणनाङ्का अङ्किताः सन्ति। एकत्रैकतो द्वादशान्तम्, अन्यत्र च दशकक्रमेण षष्टिं यावत्। महति परिधौ षष्टिर्नीलीचिह्नानि वर्तन्ते। लघुपरिधौ च द्वादशैव सन्ति। तानि क्रमेण लिप्तिका घण्टाश्च प्रदिशन्ति। घटिकायामस्यामन्यान्यपि त्रीणि मेचकवस्तूनि जङ्गमानि विद्यन्ते। तानि सूचिका आहुः। यातिलघ्वी लघुपरिधौ रेखासु समन्ततो धावते सा प्रतिलिप्तिकाप्रदेशिनी कथ्यते। या चायता सूचिका दीर्घे परिधौ शनैः शनैर्व्यवस्थितया मुद्रया संचरते सा लिप्तिका निर्दिशति। अपरा च या सुस्थिरेव प्रतिभाति सा घण्टाप्रदेशिनी कथ्यते।

अहरहो द्वादश घण्टा वाद्यन्ते। अहोरात्रे च चतुर्विंशतिः। अहर्गणैर्मासा भवन्ति। द्वैर्वार्षणि। तैश्च युगानि। प्रातष्षड्वादनसमये पूर्वस्यां दिशि भानू राजते, जायते च तेन दिनम्। पुना रात्रिश्चायाति तस्यां विधू रज्यते।

पुरा सूर्याचन्द्रमोभ्यां समयविभागो बभूव। माधवोऽयं घटीं रक्षति। एषोऽनया समयविभागं वेत्ति। अयं यथा समयं स्वकार्य्याणि निर्वर्त्तयते। वृथा समयं न गमयति।

समये स्वपतां जाग्रताञ्चाधो याति, भगो वर्द्धते, बुद्धिः समेधते, नीरोगता च जायते। युष्माभिरपि घटी रक्षणीया। महोपयोगि यत्रमिदम्। छात्राणामध्यापकानां विदुषाञ्च घटीमन्तरा न चलति कार्यम्।

प्रथमायां घटी स्तौति घटिकायां कर्त्तव्यताम्।
सम्प्राप्तायां द्वितीयायां न जाने किं घटिष्यते॥

अर्थः—घटीयत्रम् A watch. समयः The time. विभागः Division. आतपः The sun-light. निश्चीयतेस्म Decided. अनायासम् Without exertion. कालः The time. सम्मुखीनः In front of. परिधिः A circle. उभयत्र At the both ends. एकत्र In one place. दशकक्रमेण In the series of ten. षष्टिः Sixty. घण्टा An hour. नीली Black. जंगमानि Running. प्रदिशन्ति Point out. सूचिका A hand of a watch. समन्ततः On all sides. धावते Runs. व्यवस्थिता Steady. मुद्रा Position.

सुस्थिरा Motionless. प्रतिभाति Looks. अहर्गणः A number of days. वर्षम् A year. युगम् Twelve years. भगः Prosperity. वर्द्धते Increases. नीरोगता State of being without disease. रक्षणीया Must be kept. प्रस्तौति Tells. कर्तव्यता Duty. परितुष्यति Pleases क्रुध्यति Feels angry. अङ्कितः Marked. अन्यत्र At the ohter place. यावत् As far as. लिप्तिका Minute. मेचकम् Blue. आहुः Call. प्रतिलिप्तिका Second. संचरते Moves on. मासः A month अघः A sin. घटिष्यते Will take place.

व्या०—अस्मिन् पाठेऽध्यापकाः [1]प्रथममध्यमोत्तमानां पुरुषाणां व्यवहारम्, प्रक्रियादशायां रेफ[2]सकारविसर्जनीयानां रूपान्तराणि च सम्यक् पाठयेयुश्छात्रान्।

---

1 तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १।४।१०१ अस्मद्युत्तमः १।४।१०७ शेषे प्रथमः १।४।१०८ ससजुषो रुः ८।२।६६ अतो रोरप्लुतादप्लुते ६।१।११३ भो भगो अघो अपूर्वस्य योऽशि ८।३।१७। हलि सर्वेषाम् ८।३।२२ रोऽसुपि ८।३।६९ रो रि ८।३।१४ ढ्रलोपे पूर्वस्य दीर्घोऽणः ६।३।१११ विसर्जनीयस्य सः ८।३।३४ वा शरि ८।३।३६।

पञ्चविंशः पाठः।

विद्यालयः।

(विद्यालयपथे मुकुन्दमाधवौ)

मुकुन्दः—मित्र माधव! क्व गच्छसि प्रातरेव?

माधवः—इदानीमहं विद्यालयं गच्छामि।

मु०—नन्विदानीमेव सञ्जातः पाठशालासमयः?

मा०—एवम्, परिवर्तितः सः, सम्प्रत्यासन्ने ग्रीष्मर्तौ; इदानीमेकादशवादनात्प्रागेव निवर्तते पाठशाला ।

मु०—अहमपि त्वदीयां पाठशालामागन्तुमुत्सुकोऽस्मि ।
मम पाठशालायान्तु हिन्दीं पठन्ति शिशवः ।
इदानीमेकादशवर्षदेशीयोऽहम्, इच्छामि च संस्कृतमपि पठितुम् ।

मा०—बाढम्, अवश्यमागच्छ । अहं त्वां स्वकीयां पाठशालां, नेष्यामि, दर्शयिष्यामि च तत्र प्रधानाध्यापकम् । सैषाऽस्मदीया संस्कृतपाठशाला, एषोऽस्माकीनः प्रधानाध्यापकः ।

मु०—काँस्कान् विषयानत्र पठन्ति भवन्तः ?

मा०—अहमत्राङ्ग्लभाषाम्, हिन्दीम्, गणितम्, भूगोलम्, सँस्कृतञ्च पठामि ।

मु०—ननु सखे ! शुद्धं सँस्कृतं भाषते भवान् ?

मा०—मदीयो जनकः पण्डितः । जानाति सम्यक् संस्कृतम् । स मां गेहे पाठयति, शिक्षते च भाषितुं शुद्धम् ।

मु०—शक्नोष्याङ्ग्लभाषामपि वक्तुम् ?

मा०—नहि, यद्यप्यहं पठामि तां तथापि वक्तुं तत्र न पारयामि । एषोऽत्र कक्षायां मामकीन आङ्ग्लभाषाध्यापकः पीठके तिष्ठति ।

मु०—नित्यपाठेन सिद्ध्यत्यभ्यासः । आगच्छ, नमस्कुर्वोऽध्यापकम् ।

उभौ—कक्षां प्रविशेव । विलम्बो जायतेऽधुना । एषको देवदत्त आयाति । सैष गच्छत्युपाध्यायः पाणिनीये विचक्षणः ।
शालामागच्छतो बालाञ्जनकौ परितुष्यतः ।
गुरवोऽस्मै न क्रुद्ध्यन्ति पाठयन्त्यात्ममित्रवत् ॥

अर्थः—विद्यालयः A school. आसन्नः Near by. त्वदीयां yours. असाकम् Our. अपि Even. नेष्यामि Shall lead. आङ्ग्लभाषा The English language. जनकः Father.

शुद्धम् Correct. भाषा The language. पारयामि I am able. सिद्ध्यति Is achieved. एव Also. संजातः Has become. आगन्तुम् For comming. एकादशवर्षदेशीयः Nearly of eleven years. वाढम् Very well. आसाकीनः Of us. गणितम् Arithmetic. सम्यक् Well. शक्नोषि Able. भवान् you (used in respect). नमस्कुर्मः We present our salutation. अभ्यासः Study. परिवर्तितः Changed. सम्प्रति Now-a-days. उत्सुकः Eager. इच्छामि I wish. अवश्यम् Certainly. विषयः Subject. भूगोलः Geography. शिक्षते Teaches. भाषते Speaks. यद्यपि Although. मामकीनः Of mine. विलम्बः Delay.

व्या०—अस्मिन् पाठेऽध्यापकाः शब्दानामेकत्वद्वित्वत्रित्वप्रयोगान्[1] सुलोपविषयाँश्च[2] पाठयेयुश्छात्रान्।

---

1 द्वेकयोर्द्विवचनैकवचने १।४।२२ बहुषु बहुवचनम् १।४।२१ एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६।१।१३२ सोऽचि लोपे चेत्पादपूरणम् ६।१।१३४।

षड्विंशः पाठः।

कृषाणः।

छात्राः! पश्यत क्षेत्रे कृषाणम्। स तत्र हलं चालयति। यद्यपि स पठितुं लिखितुं वापि न जानाति तथापि कृषि-कर्म्मणि निपुणो वर्तते। तेन कृषिविद्यया धान्यमुत्पाद्यते। येन वयं जीवामः।

कृषाणः सदा क्षेत्रेषु श्रमं कुर्वाणो वर्तते। किन्तु वर्षर्तौ सविशेषं स तत्र लग्नो भवति। एकदा फालमुखेन हलेन भूमिं कर्षति, ततो लोष्ठान् भित्त्वा समीकरोति। दूर्वादिकं निःशेषमपसार्य द्वितीयाकरोति। अन्यदा तृतीयाकरोति। ततश्चतुर्गुणां करोति। अनन्तरं पञ्चगुणां करोति। केचित् कृषीवला विंशतिगुणामपि सम्पादयन्ति भूमिम्।

उपशरदं बीजाकुर्वन्ति क्षेत्राणि सुदक्षाः कृषिजीविनः। अनुवापं बीजानि क्षितौ मूलन्ति प्ररोहन्ति च। रूढं क्षेत्रं दृष्ट्वा प्रसन्ना भवन्ति कृषाणाः। ततोऽवकरजलदानैः सस्यमुपचीयते। प्रायो मासत्रयेण सस्यानि विपाकमायान्ति। पचमानं कृषिफलं विहङ्गमादिभ्यो रक्षन्ति कृषीवलाः। अधिचैत्रमुपवैशाखं वा रम्यपाकेन धूसरत्वमापन्नानि तानि लुनन्ति ते। अयं तेषां सस्यलवनसमयः। स्तबकेषु बद्धं सस्यमुपक्षेत्रं खलं समानीय तदुपरि वृषभद्वन्द्वं भ्रामयित्वा मर्दयन्ति। पवने पवन्ते। पूतमन्नं राशीकृत्य गृहमानयन्ति। पृथग्भूतं बुसं पशूनां कृते भवति। प्रयोजनादधिकमन्नं कृषाणा विक्रीणन्ते। अनेन व्यापारेण धनमवाप्य ते धनिनः प्रतिष्ठिताश्च जायन्ते।

अन्नं वयं खादामः। तन्मया हि प्राणा अस्माकम्। यद्यन्नं न भवेत्, वयं न जीवेम।

पुरा राजानः कृषाणेभ्यः कृतज्ञतां दर्शयाञ्चक्रुः। ते बहुधोपचक्रुस्तेषाम्, करञ्च षष्ठांशमेवाददुः। अस्माभिस्तेषां कृतज्ञैर्भाव्यम्। तेऽस्माकमुपकर्तारो मित्राणि सन्ति।

ग्रीष्मवर्षावसन्तेषु क्षेत्राकर्षपरो हली।
कष्टेनोत्पादयन्नन्नं लोकानुपचिकीर्षति॥

अर्थः—कृषाणः A farmer. पश्यत You see. तत्र There. हलम् A plough. चालयति Drives. यद्यपि Though. कृषिकर्म Cultivation. निपुणः Expert. धान्यम् Grain. उत्पाद्यते Is produced. जीवामः We live. सदा Always. कुर्वाणः Doing. वर्षर्तौ In the rainy season. सविशेषम् Particularly. लग्नः Engaged. एकदा Once. कर्षति Ploughs. ततः After that. दूर्वा A kind of grass. निःशेषम् Completly. भित्त्वा Having broken. अपसार्य Having removed. द्वितीयाकरोति Ploughs the field second time. उपशरदम् Near to the autumn. बीजाकरोति Sows the seeds. अनुवापम् After sowing. क्षितौ In the ground. मूलन्ति Take roots. प्ररोहति Grows up. दृष्ट्वा Having seen. प्रसन्नः Pleased. अवकरम् Manure. सस्यम् Corn. उपचीयते Grows. विपाकः Ripening. विहंगमः A bird. अधिचैत्रम् In Chaitra. उपवैशाखम् In Vaishakha. रम्यः Beautiful. धूसरः Gray. लुनाति Cuts up. शस्यलवनसमयः Harveot time. स्तवकः A bundles. उपक्षेत्रम् Near the field. खलम् Threshing floor. वृषभः An ox. द्वन्द्वम् A pair.

पवनः The wind. पवन्ते Clean पृथग्भूतम् Separated. बुसम् Chaff. क्रते For. विक्रीणते Sells. व्यापारः Business. धनम् Wealth. अवाप्य Having got. प्रतिष्ठितः Respected. खादामः We eat. पुरा In olden time. कृतज्ञता Gratefulness. दर्शयाञ्चक्रुः Showed. उपचक्रुः Obliged. करम् Tax. आददुः Accepted.

व्या०—अस्मिन् पाठेऽध्यापका [1]अव्ययीभावसमासोदाहरणानि बहुलप्रयुक्तान् [2]त्वादीन्, कृदन्तप्रत्ययान् दादींश्च तद्धितान् पाठयेयुश्छात्रान्।

---

1 अव्ययीभावः ३।१।५ अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु २।१।६ अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७ नपुंसकादन्यतरस्याम् ५।४।१०८ क्तक्तवतू निष्ठा १।१।२६ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ३।४।१८ समानकर्तृकयोः पूर्वकाले ३।४।२१ ससम्याञ्चल ५।३।१० सर्वैकान्यत्किंयत्तदः काले दा ५।३।१५ सर्वस्य सोऽन्यतरस्यां दि ५।३।६।

सप्तविंशः पाठः।

मृगेन्द्रः।

सिंहो मृगश्रेष्ठः परमबलिष्ठश्च भवतीति मृगेन्द्र इत्युच्यते। अयमफ्रीकादिष्वन्यदीयदेशेषु भारतीयवनेष्वपि च क्वचित् क्वचिज्जायते।

छात्राः! चित्रे मृगेन्द्रं पश्यत। कीदृग्भीषणाकृतिः कालकरालः पशुरयम्। असावखिलास्वपि पशुजातिषु समर्थो वीरस्वभावश्च भवति। अस्य भयमामनन्ति वनजन्तवः। काननेषु ये वराहाः, मर्कटाः, भल्लूकाः, खड्गिनः, महिषाः, गोमायवः, बडालाः, वृकाः, हरिणाः, चमर्य्याः, गवयाः, व्याघ्रादयः, पशवः, तेषामयमदत्ताभिषेको राजास्ति।

अस्य पूर्वकायो गुरुर्भवति। स्कन्धदेशे या बालपङ्क्तिः सा तु "आलम्" इत्युच्यते। चतुष्पदोऽस्य विशालं वक्षःस्थलम्, प्रक्षीणा कटिः, सकेशरा सुदृढा ग्रीवा, सुस्थौ गुप्तप्रखरनखरावग्रपादौ, पिङ्गले भास्वती च नेत्रे' सश्मश्रु भयावहं मुखम्, तत्र तीक्ष्णा दन्ताश्च भवन्ति। पुच्छमस्यायतं वरीवर्ति।

वनवास्तव्यो दिवाऽयं घनारण्येषूपजलाशयं गुहाश्रयः शेते। एष न पालनीयो नापि विनेतव्यः। अयं सद्योमांसप्रियो भवति। असौ रात्रावेवाखेटं करोति खादति च नखभिन्नान् कृत्वा पशून्। यदाऽयं गर्जनां कुरुते तदा सर्वे वनजन्तवः कम्पमारभन्ते। अयं कृष्णसर्पाद्भिभेति। राजानो महाराजा अन्ये चाखेटविलासिनो नृसिंहा राजपुरुषाश्चास्याखेटं कुर्वन्ति। तेन शूरभावो जागर्ति तेषाम्।

बिडालोऽपि सिंहस्य सजातीयोऽस्ति। अयं मूषकादीन् कपोतांश्च धृत्वा खादति। पोषितोपि न जायते सत्स्वभावः। मार्जार्यस्य मातृस्वसा कथ्यते। चित्रकव्याघ्रादयोऽप्यस्य सजातीया एव सन्ति। तेऽप्याखेटजीविन एव भवन्ति।

बिडालश्चित्रको व्याघ्रस्तरक्षुर्भल्लुको वृकः।
व्यापाद्य भक्षका एते मृगेन्द्रो मूर्ध्नि वर्तते॥

अर्थ—सिंहः A lion. परमबलिष्ठः Very strong. अन्यदीयदेशः A foreign country. भारतीयः Indian. जायते Takes birth. चित्रम् A picture. कीदृक् Of what kind. भीषणा Fearful. आकृतिः Appearance. समर्थः Strong. वीरस्वभावः Valiant nature. आमनन्ति Think. काननम् A forest. वराहः A boar. मर्कटः A monkey. खड्गी A kind of buffalo. महिषः A buffalo. गोमायुः A jackal. बिडालः A cat. वृकः A wolf. चमरी A kind of a forest-cow. गवयः A kind of the bull. व्याघ्रः A tiger. अभिषेकः A Coronation. राजा A king. पूर्वकायः The front part of the body. गुरुः Heavy. विशालम् Broad. प्रक्षीणः Thin. कटिः The waist. ग्रीवा The neck. गुप्तः Hidden. प्रखरः Sharp. नखरः A nail. पिङ्गलम् Grey. भास्वती shining. सश्मश्रु With mustaches. तीक्ष्णः Sharp. पुच्छम् Tail. आयतम् Long. वनवास्तव्यः Forestine. दिवा In the day time. गुहा A cave. शेते Sleeps. पालनीयः Tamable. विनेतव्यः Trainable. सद्यः Fresh. मांसप्रियः Fond of flesh. नखभिन्नः Torn by nails. भक्षयति Eats up. रात्रौ At night. आखेटम् Hunting. गर्जना Roar. कम्पः Trembling. आरभन्ते Begin. कृष्णसर्पः A black snake. बिभेति Fears. सजातीयः Of the same kind. महाराजः An

emperor. राजपुरुषः A king's man. शूरभावः Bravery. सजातीय Caste fellow. मातृस्वसा Mother's sister. व्यापाद्य Having killed तरक्षुः A Kind of the tiger.

व्या०—अस्मिन् पाठेऽध्यापकास्तत्पुरुषसमासम्, तव्यत्तव्यानीयरः, कृदन्तप्रत्ययान्, तद्धितीयं छप्रत्ययञ्च पाठयेयुश्छात्रान्।

---

1 कर्तृकरणे कृता बहुलम् २।१।३२ उपमानानि सामान्यवचनैः २।१।५५ विशेषणं विशेष्येण बहुलम् २।१।५७ सन्महत्परमोत्कृष्टाः पूज्यमानैः २।१।६१ तव्यत्तव्यानीयरः ३।१।६६ वृद्धाच्छः ४।२।११४।

अष्टविंशः पाठः।

गजः।



अयं गजोऽस्ति। एष स्थलचरेष्वखिलेषु जन्तुषु दीर्घतमकायः, पशुत्रिलोक्यां शोभनाकृतिश्चतुष्पाद्। युष्माभिरयं राजद्वारे दृष्टो भवेत्। अयमत्र चित्रे वर्तते। अयं हस्ती दन्ती द्विरदो मतङ्गो नागः करी स्तम्बेरम इत्यादिभिरनेकैर्नामभिरुच्यते।

विशालदेहोऽयं गजराजः। अस्य सुदृढा दर्शनीया च दन्तद्वयी। तस्या अन्तराले लम्बमाना शुण्डास्ति। शुण्डेयमेतस्य करो हस्तो वेत्युच्यते। इयमेवास्य नासिकापि भवति। अनया पुष्पाण्यपि चेतुं शक्नोत्ययम्। शुण्डाया अधोभागे कन्दराकारं मुखं वर्तते। शूर्पानुकारौ कर्णौ, लघुनी नेत्रे, चत्वारः स्तम्भानुकाराः पादाः नातिलम्बं च पुच्छं भवति।

गजो मुखेन नासिकया च पानीयं पिबति, अत एवायं द्विपः कथ्यते। अयं बलिष्ठो दक्षश्च भवति। मनुष्यैर्विनीतः पालितश्चायं भारान्वहन् वैतनिकेभ्योऽतिशेते। ब्राह्मदेशे भारतेऽस्मिँश्चायं दारवेषु कार्य्यालयेषु भारं वहति।

आरण्यकोऽयं निर्भीकः संघान् संपादयन् यूथाधिपत्वेन संचरते। एष द्विजिह्वेभ्यो जाङ्गलवृश्चिकेभ्यश्च बिभेति। असौ ज्वरं न सहते। हस्तिन एको नियन्ता भवति। यो हस्तिप इत्युच्यते। अयं तस्य खाद्यवस्तून्युपनयति, पानीयं पाययति, सति कार्य्ये उत्थापयति निवेशयति च, हस्ती चास्याज्ञामनुपालयति।

पुरा पार्थिवाः करिण्वारूढवन्तः। वारयात्रिकेषु माङ्गलिक-माहोत्सवेष्वन्येषु च शोभार्थमाग्रगान् कृतवन्तो मातङ्गान् पौराः। राजकुलेषु करेणुसमारूढा राजकदुहितरः स्वायम्वरेषु वरान् वृतवत्योऽभूवन्।

गजा यद्यगजा नृणां वश्याः कुर्वन्ति शासनम्।
तेषां प्रज्ञासहायानां को न लोके वशंवदः॥

अर्थ—गजः An elephant. अखिलः All. दीर्घतमः Largest. कायः The body. त्रिलोक्याम् In three worlds. चतुष्पाद् A Quadruped. राजद्वारे At the royal gate. विशालः Huge. दर्शनीया Worth seeing. अन्तराले In the middle. लम्बमाना Hanging down. शुण्डा The trunk. नासिका The nose. चेतुम् To pick up. कन्दरा A Cave. सूर्पः A winnowing fan. स्तम्भः A piller. दक्षः Wise. विनीतः Trained. पालितः Domesticated भारः Burden. वहन् Carrying. वैतनिकः A labourer. अतिशेते Surpasses. दारुः Timber. दारवः Related to timber. कार्यालयः Workshop. आरण्यकः Forestine. निर्भीकः Fearless. संघः A company. संचरते Walks. द्विजिह्वः A snake. वृश्चिकः A scorpion. सहते Endures. नियन्ता Controller. खाद्यवस्तूनि Eatable things. उत्थापयति Makes him stand up. निवेशयति Makes him kneel down. आज्ञा An order. अनुपालयति Obeys. पार्थिवः A king. करी An elephant. आरूढवन्तः Used to ride. वरयात्रा Marriage procession. माङ्गलिकः Auspicious. महोत्सवः Festival शोभार्थः For splendour. राजकुलम् Royal family. करेणुः A female elephant. दुहिता A daughter. स्वयंवरः Choice marriage. करेणुः A female elephant. शासनम् An order. अगजः One who is born in a mountain. वश्यः Obedient. सहायः Helper.

व्या०—अस्मिन् पाठेऽध्यापका द्विगुसमासोदाहरणानि, कृदन्तान् क्तक्तवत्वादीन् प्रचलितप्रयोगांस्ताद्धितांश्चाणादीन् प्रत्ययान् पाठयेयुरिच्छात्रान्।

संख्यापूर्वको द्विगुः २।१।५२ क्तक्तवतू निष्ठा १।१।२६ ण्वुल्तृचौ ३।१।१३३ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ३।४।१८ समानकर्तृकयोः पूर्वकाले ३।४।२१ प्राग्दीव्यतोऽण् ४।१।५३ तद्धितेष्वचामादेः ७।२।११७ तस्यापत्यम् ४।१।९२।

एकोनत्रिंशः पाठः।

कपिः।

कपिरपि पशुजातौ संख्यातो जायते। अयमाकृत्या बहुधा मनुष्यमनुकरोति। अस्य मुखम्, नासिका, कर्णौ, नेत्रे, हस्तौ, पादौ च प्रायशो नरस्येव भवन्ति। अस्य पुच्छमेव नरेभ्योऽधिकं भवतीत्ययं वानर इत्युच्यते लोके।

वानराः केचिद्भ्रस्वाकारा दीर्घलोमानश्चोपलभ्यन्ते। अन्ये नीलोज्ज्वलमुखा लम्बलाङ्गूला रक्तमुखाश्च भवन्ति। नीलमुखा वानरा बलवन्तो भवन्ति।

वानरोऽयं मन्दमेधा नापि सुमेधा युज्यते वक्तुम्। एष यद्यपि मनुष्यमनुचेष्टते किन्तु न चतुरप्रकारम्।

अस्य भोजनं विविधानि फलानि, गृहं सान्द्रास्तरवः, स्वजातिः स्वसन्ततिश्चात्यन्ता प्रिया भवति।

अयं व्याघ्रादिरिव न सर्वथा जाङ्गलः पशुः। नापि हिंसकः। परञ्चायं शाखासु स्वैरं धावत इति शाखामृगः पशुषु प्रसिद्ध्यति। अयं नातिदूरं वसतेरारामेषु, लम्बोदकासु वाटिकासु, सदाफलेषु कान्तारेषु च प्रांशुवृक्षशाखाश्रयः फलाहारो निवसति। मनुष्यभोज्येषु भोग्येष्वप्यस्य सौख्यं भवतीति यदा तदापणेषु लुण्ठानः प्रवर्तते।

असौ स्वतन्त्रता रोचते। स्वैरताविघातकोऽस्य शत्रुत्वमापद्यते। अयं सारमेयादिरिव मनुष्यजातौ सख्यं न प्रदर्शयति। बद्धः पालितश्च कदाचिदाज्ञाकरो जायते।

अस्य स्वभावे द्रढिमा मार्दवं सहनशीलत्वञ्च न भवति। अस्याकृतिर्गुणान्नानुयाति। ग्रामेषु नगरेषु चायं चौर्य्यं पश्यतोहार्य्यञ्चापि विदधाति। वस्तून्यादाय पादपादिष्वारोहति। तानि च खाद्यवस्तुप्रतिदानेन परिवर्तयते। चर्चितश्च शतधा छिनत्ति। कापेयं कुलं मार्गेषु फलानि शाकानि धान्यञ्च नयत्सु नरेषु नारीषु च प्रसरति। योषिद्भ्यः पानीयकुम्भान् पातयति। परिपक्वसस्यफलेषु क्षेत्रेषु गत्वा सस्यमुन्मूलयति। क्रुद्धा वानराः केशाकेशि मुष्टामुष्टि वा बहुधा युद्ध्यन्ति।

अयं परकार्य्यचर्चकोऽपि भवति। अनेन व्यापारेण यदा कदायं दण्ड्यो वध्यो वापि जायते। अस्य चापल्यं मौर्ख्यञ्च लोके प्रसिद्धम्। अस्मिन्ननुकृतिः स्तुत्यो गुणः। तेनायं स्वस्योदरंभरिः, वानरविनेतृणां नृणाञ्च जीविकाकरो जायते।

अक्रूरस्य सुभावस्य गुणज्ञस्य सुखाकृतेः।
भद्रं सर्वत्र संभाव्यं वानरस्य नरस्य वा॥

अर्थ—कपिः A monkey. संख्यातः Counted. अनुकरोति Imitates अधिकम् Additional वानरः A monkey. ह्रस्वाकारः Of short size. दीर्घलोमा Having long hair. लम्बलाङ्गूलः Long tailed. रक्तमुखः One having a red mouth. नीलमुखः Black mouthed. मन्दमेधाः A dull witted. सुमेधाः Inteligents युज्यते Is fit for. अनुचेष्टते Imitates. चतुरप्रकारम् Cleverly. विविधानि Of various. सन्ततिः Off spring. सर्वथा In all ways. जाङ्गलः Forestine. हिंसकः Noxious. परम् But. शाखा A bough. धावते Runs. नातिदूरम् Near. वसतिः

A dwelling place. आरामः A garden. उदकम् Water. वाटिका An archard. कान्तारः A forest. प्रांशुः Lofty. भोज्यम् Fit for eating. भोग्यम् Fit for enjoying. सौख्यम् Fondness. आपणम् Market. लुण्ठानः A robber. स्वतन्त्रता Freedom. शत्रुत्वम् Enmity. सारमेयः A dog. सख्यम् Friendship आज्ञाकरः An obedient. स्वभावः Nature. द्रढिमा Steadiness. मार्दवम् Tenderness. सहनशीलत्वम् Endurance. अनुयाति Follows. ग्रामः A village नगरम् A city. चौर्यम् Theft. पश्यतोहार्यम् Robbery. विदधाति Does.पादपः A tree. आरोहति Climbs up. प्रदानम् Gift. परिवर्तयते Exchanges चकितः Irritated शतधा Into hundered pieces. छिनत्ति Cuts. कापेयम् A group of monkeys. मार्गः Path. शाकम् Vegitable. प्रसरति Spring upon. योषित् A woman. कुम्भः A pot. उन्मूलयति Roots out क्रुद्धाः Angry. केशाकेशि Seizing by hair. मुष्टामुष्टि Hand to hand. युध्यति They fight. परकार्यचर्चकः Inter meddler. दण्ड्यः Punishable. वध्यः Fit to be killed. चापल्यम् Welfare. मौर्ख्यम् Foolishness.प्रसिद्धम् Famous. अनुकृतिः Imitation. उदरंभरिः Selfish. विनेता Instructer. भद्रम् Good.

व्या०—अस्मिन् पाठेऽध्यापका बहुव्रीहिसमासम्, यत्-ण्यत्-क्यपादीनां कृदन्तप्रत्ययानां ष्यञ्-ण्यत्-यक्-त्व-तल्-ढगादीनां तद्धितप्रत्ययानाञ्च दिग्दर्शनं कारयेयुः ।

शेषो बहुव्रीहिः २।२।२३ अनेकमन्यपदार्थे २।२।२४ ऋहलोर्ण्यत् ३।१।१२० अचो यत् ३।१।९७ एतिस्तुशास्वृदृजुषः क्यप् ३।१।१०९ दण्डादिभ्यो यत् ५।१।६६ गुणवचनब्राह्मणादिभ्यः कर्मणि च ५।१।१२४ तस्य भावस्त्वतलौ ५।१।११९ कपिज्ञात्योर्ढक् ५।१।१२७ पृथ्वादिभ्य इमनिज्वा ५।१।१२२ ।

त्रिंशः पाठः ।

उष्ट्रः ।

उष्ट्रोऽप्येको विचित्रः पशुरस्ति । अयमुष्णताप्राधान्येषु देशेषु बाहुल्येन दृष्टिचरो जायते । तत्रापि धन्वदेशे संघशः प्रादुर्भवति ।

यत्र च बहूनि कार्य्याण्ययं साधयति मनुष्याणाम्। गोगजतुरङ्गमहिषवृषभेषु गृह्यपशुष्वयं प्राकृतो मूर्खः।

अस्य लम्बायमानां ग्रीवाम्, ह्रस्वतमौ कर्णौ, बल्लीलम्बान् पादांश्च दृष्ट्वा रुदन्तोऽपि प्रसन्नाननाः संजायन्ते पित्रोः क्रोडेषु शिशुकाः।

अस्य पृष्ठदेशे मांसपिण्डो भवति यः ककुदित्युच्यते अश्वोष्ट्रखरा भारवाहकाः कथ्यन्ते तेषु पूर्वो मृदुः कुलीनो जातीयश्च, परोऽल्पशक्तिर्लघुश्च। मध्यस्त्वयं मध्यमस्थितिजुषां मरुस्थलनिवासिनां वाह्यः प्रयोज्यश्च जायते।

उष्ट्रकोऽयं निदाघतप्तेषु वालुकाप्रायेषु मरुषु यत्राश्वकादयो न संचरितास्तत्रावश्यकवस्तुजातं प्रापयति। अस्य पादा आयता कोमला अवक्राश्च भवन्ति, अतः सैकते न निमज्जन्तीति गुरुभारोऽप्ययं सुखेन प्रयाति।

विनापि घासपानीयाभ्यां मरुषु सुदूरं यात्रां कुर्वाणोऽयं श्रमितो न भवति। प्रायेणायं यात्रारम्भात्प्राक् प्रचुरं जलं पिबति। अस्य ग्रीवायां मांसपेशीषु जलकोशा भवन्ति। ते जलेन पूरितास्तिष्ठन्ति यदाऽयं पिपासितो जायते तदा तज्जलमुपयुनक्ति।

यत्र मरुषु न सिकतामृत्तिकाभ्यामन्तरा किमपि दृष्टिपथमायाति तत्र पारयत्ययं क्रमेलकः। यथा जना नौपोतविमानानारुह्य सागरपारं यान्ति तथैवैनमारुह्य सैकतनिधेः पारं प्रयान्ति लोका इत्ययं "सैकतजलनिधिपोतः" इत्युच्यते।

दुष्टाग्रहो दुरात्मापि वक्रो नापि धुरन्धरः।
खलूष्ट्रः प्राकृतो मूर्खः, मरुदेशे प्रपूजितः॥

अर्थः—उष्ट्रः A camel. विचित्रः Wonderful. धन्वदेशः The hot country. संघशः Heaps of. साधयति Performs. यत्र Where. बहूनि Many. गृह्यः Domestic. प्राकृतः Natural. मूर्खः Foolish. लम्बायमाना Long. ह्रस्वतमः Very short बल्लीलम्बः Long like a pole. रुदन्तः Crying. पित्रोः Of father and mother.

क्रोडम् The lame शिशुकः A baby. ककुद् The hump. खरः An ass. भारवाहकः A beast of burden. मृदुः Gentle. कुलीनः A horse of good breed. जातीयः Noble. लघुकः Very small. मरुस्थलनिवासिनः Residents of a desert. वाह्यः A beast of burden. प्रयोज्यः To be set to work. मरुः A desert अश्वकः A pony. संचरितः Passed over. प्रापयति Conveys. आयता Flat. कोमलः Tender. सैकतम् [illegible]y place. निमज्जति Sinks into. गुरुभारः One who carries heavy load. सुखेन Easily. प्रयाति Goes. घासः grass. सुदूरम् Very far यात्रा Journey. श्रमितः Tired. आरम्भः Beginning. प्रचुरम् Plenty of. कोशः A bag. पूरितः Full of. पिपासितः Thirsty. उपयुनक्ति Uses. पारयति Enables to carry. क्रमेलकः A camel. पोतः A ship. सागरः The sea. दुष्टाग्रहः Bad habituated. दुरात्मा Cruel. वक्रः Croocked. धुरन्धरः A great leader. प्रपूजितः Regarded.

व्या०—अस्मिन् पाठेऽध्यापका द्वन्द्वसमासोदाहरणानां त्रयू, इतच् स्वार्थे कनादीनां तद्धितप्रत्ययानां शतृशानचादीनां कृदन्तप्रत्ययानाञ्च दिग्दर्शनं कारयेयुश्छात्रान्।

चार्थे द्वन्द्वः २।२।२९ द्वन्द्वे घि २।२३२ अजाद्यदन्तम् २।२।३३ अल्पाच्तरम् २।२।३४ सप्तम्याखल ५।३।१० तदस्य संजातं तारकादिभ्य इतच् ५।२।३५ लटः शतृशानचावप्रथमासमानाधिकरणे ३।२।१२४।

एकत्रिंशः पाठः।

सूर्य्यः।

सूर्य्योऽधुना प्राच्यामुदेति। अरुणिमेदानीं विजृम्भते सर्वासु दिक्षु बालातपेन शोभन्ते पुष्पिताान्युद्यानानि। अवश्यायबिन्दवो गलन्ति बालतृणाग्रेभ्यः। सुखयन्ति लोचनयुगलानि क्षेत्रेषु मरकतमणिकान्तीनि सस्यानि। चण्डं न तपति पूर्वाह्णभानुः। आकाशमार्गमारोहति शनैः शनैः सूर्य्यः। अस्यैव गत्याहोरात्रं भवति। अस्य पूर्वाह्णपराह्णावारोहणावरोहणकालौ स्तः। सूर्योऽस्मभ्यं प्रकाश-

मौष्ण्यं जीवनञ्च ददाति। सूर्य्यातपेन व्यवसायशक्तेः संचारो जायते चराचरेषु। मनुष्याः कार्य्याणि कुर्वन्ति। पक्षिणः प्रसन्नाः सन्तो मधुरं कूजन्ति। पशवो जात्यनुकूलं चेष्टन्ते। सरीसृपाः प्रसर्पन्ति। यादांसि जले तरन्ति। वृक्षाः फलानि, लताश्च पुष्पाणि धारयन्ति। सस्यानि पच्यन्ते। यदि सूर्य्यो नाभविष्यत्, सर्वे जन्तवो वयञ्चा-मरिष्याम।

सूर्य्य एको महानग्निगोलोऽस्ति। अस्य किरणाः प्रचण्डा भवन्ति। अस्यातपे जना ग्रीष्मर्तौ मध्याह्ने विनातपत्रं गन्तुं न शक्नुवन्ति।

सूर्य्यो लघुः प्रतिभाति। यतश्चायं सुदूरे वर्ततेऽस्माकम्॥

अयं भानुः सूर्य्य आदित्यो भास्करः प्रभाकरो द्युमणिः सविता रविर्दिनमणिरित्यादिभिस्नेकैर्नामभिरुच्यते। सूर्य्योऽस्मान् पातीति "पषी" इत्यपि प्रोच्यते जनैः।

अजेयो बलवाँश्चण्डो दुर्गस्थः करवानपि।
सूरः पतनमाधत्ते लोकानां गतिरीदृशी॥

अर्थः—सूर्यः The sun. प्राच्याम् In the east. उदेति Rises. इदानीम् Now. विजृम्भते Spreads. बालातपः The morning sunshine. शोभन्ते Look beautiful. उद्यानम् A garden. अवश्यायः The due. सुखयति Pleases. लोचनम् An eye. युगलम् A couple. मर्कतमणिः A green diamond. कान्तिः Beauty. चण्डम् Hot. तपति Shines. पूर्वाह्णभानुः The morning sun. आकाशमार्गम् In the sky. शनैः Slowly. आरोहणम् Rising. प्रकाशः Light. औष्ण्यम् Heat. जीवनम् Vitality. व्यवसायशक्तिः Working power. कूजन्ति They sing. चेष्टते Behaves. सरीसृपः A reptile. प्रसर्पति Creeps. यादांसि The beings of water. तरति Swim. धारयति Bear on. किरणः A ray. आतपत्रम् An umbrella. प्रतिभाति Looks like. अजेयः Unconquerable. बलवान् Powerful. चण्डः Hot. करवान् Who has hands. सूरः The sun. पतनम् A down fall आधत्ते Receives.

व्या०—अस्मिन् पाठेऽध्यापकाः कर्म्मधारयसमासोदाहरणानि स्त्रियां क्तिन्नादीन् कृदन्तप्रत्ययान् तद्धितप्रत्ययांश्च तांस्तान् पाठयेयुः।

तत्पुरुषसमानाधिकरणः कर्मधारयः १।२।४२ स्त्रियां क्तिन् ३।३।९४।

द्वात्रिंशः पाठः ।

प्रभातम् ।



अयं प्रभातसमयः । आरक्ता वर्तते पूर्वा दिक् । सूर्य्योऽधुना पूर्वस्यां दिश्युदीयमानो वर्त्तते कुक्कवाकुरुच्चैः कूजति । अन्येऽपि पक्षिणो नीडेषु कलरवं कुर्वन्ति । नरा नार्यो बालकाश्च प्रबुद्धाः सन्तः ईश्वरं स्मरन्ति । कुन्द-कदम्ब-जातिका-सेवती-मालती-पुष्पाण्युद्यानेषु विकचन्ति । परागपीता मधुकरास्तेभ्यो मकरन्दमाहरन्ति । वायुः शीतलो मन्दश्च वाति । जलाशयेषु नदीषु च स्नान्ति लोकाः । ब्राह्मणाश्चोदयन्तं भास्वन्तं जलेन समर्घयन्ति गौरमयूखोऽरुणश्चन्द्रः पश्चिमायामाशायामस्तमेति । मन्दायते ग्रहगणः । गोपाला गा दुहन्ति । गोप्यो दध्यालोडयन्ति । दध्योदनमोदकादिभिः कल्य-भोजनञ्च निर्वर्तन्ते शिशवः ।

तडागेषु कमलानि विकसन्ति । भ्रमरास्तेभ्यो मध्वाददते । मनुष्याः स्वे स्वे कर्म्मणि लग्नाः सन्ति । योषितो गृहकार्य्यासक्ता वर्तन्ते । अजापालोऽजाश्चारयितुं वनं नयति । क्षेत्रपालो हलमादाय क्षेत्रं गच्छति ।

कुमुदिन्यस्तल्लेषु म्लानिमायान्ति । प्रक्षीणच्छविश्चन्द्रो न राजते नभसि । नक्षत्राणि लुप्तानि । देवपूजको मन्दिरे घण्टां वादयते । शंकरं पूजयते शैवः । विष्णुमुपतिष्ठते वैष्णवः । आहिताग्निर्वह्नीन् जुहोति । वेदपाठिन उच्चैः पठन्ति वेदमन्त्रान् । पाठशालां प्रयान्ति च्छात्राः । सुखमेधते चक्रवाकीमिथुनम् ।

उलूकाश्चान्धकारेष्वात्मानं गोपायन्ति । जतूकाश्चान्धतमासु गुहासु प्रविशन्ति । निलीयते निद्रा । विलीयते तमः । परायते भयम् । प्रौढीयते प्रकाशः । आलोकमयं जायते जगदखिलम् ।

भुवनानि प्रकाशन्ते प्रभाते भास्करोदये ।
उलूका न प्रकाशन्ते चौरा नभसि तारकाः ॥

अर्थः—प्रभातम् The morning. आरक्ता Quite red. उदीयमानः Rising. कुक्कुटः A cock. उच्चैः Loudly. नीडम् A nest. कलरवः Sweet singing. प्रबुद्धः Got up. सेवती The rose flower. मकरन्दः Flower juce. आहरन्ति Bring. शीतलः cold. मन्दः Slow. वाति Blows. जलाशयः A tank स्नान्ति They take bath. भास्वान् The sun. समर्घयन्ति They worship. गौरः Grey. मयूखः A ray. अरुणः Red. आशा Direction. अस्तमेति Sets. मन्दायते Looks gloomy. ग्रहगणः The group of planets दुहन्ति They milk. ओदनम् Boiled rice. कल्यभोजनम् Breakfast. कमलम् Lotus. विकचन्ति They open. भ्रमरः A bee. योषितः A woman क्षेत्रपालः A farmer. तल्लः A small pool. म्लानिः Sadness. प्रक्षीणः Weak. नभः The sky. नक्षत्राणि The stars. मन्दिरम् A temple. शैवः A worshiper of god shiva. उपतिष्ठते Worships. वैष्णवः A worshiper of god vishnu. जुहोति He sacrifices. मिथुनम् A copule. उलूकः An owl. जतूकः A bat अन्धतमः Full of dark. गुहा A cave. प्रविशन्ति They enter. निलीयते Disappears, परायते Goes away. आलोकमयम् Full of light. जगत् The world.

व्या०—अस्मिन् पाठेऽध्यापकाः पूर्वपाठेषु पठितस्य व्याकरणविषयस्यावृत्तिम्, सरलसरलां वाक्यरचनाञ्च कारयेयुः ।

त्रयस्त्रिंशः पाठः ।

वायुः ।

वायुरस्माकं जीवनीयपदार्थेष्वेकतमोऽस्ति । अस्य रूपमाकृतिर्वा न भवति । यदाऽयं वेगेन प्रवाति तदा स्पर्शेन वयमेनमनुभवामः । स्पर्शेन्द्रियञ्च त्वग्वर्तते । वायुः सदैव सर्वत्र च विद्यमानस्तिष्ठति । अयं पवते सर्वमिति पवनः कथ्यते ।

अस्य श्वसनः स्पर्शनोऽनिलः सदागतिर्मरुज्जगत्प्राणो नभस्वदित्यादीनि बहूनि नामानि सन्ति ।

वायुर्हि जीवनं जीवानाम् । वायुमन्तरेण वयमन्ये च प्राणिनः क्षणमपि जीवितुं न शक्नुमः । यथा जले निवसन्तो झषा जला-

त्पृथङ्न जीवन्ति तथैव सर्वेऽपि प्राणिनो वायुमन्तरा जीवनं न धारयन्ति । उदधौ यादांसीव वयमपि नभस्वतः पारावारे निमग्नाः स्मः ।

वायुः सदैवास्मानभितो वर्तते । परश्चास्य नीरूपत्वान्न वयमेनं द्रष्टुं प्रभवामः । पतत्रिणां पक्षतिदलविवरादिषु वायुः कार्य्यरूपेण वरीवर्ति । स एव तानुड्डाययति विहायसम् । पुरा वायुवशान्नावः समुद्रे तरन्ति स्म । वायुमयानि शरीराण्यप्यन्तरिक्षे भवन्ति ।

वायुर्न केवलं प्राणिनां जीवनमेव किन्तु देहनिर्वाहेऽप्ययमावश्यकं साधनम् । अयं प्राणिनां शरीरेषु प्रविश्य तानि विशोधयति । आगारादीनि स्वमण्डलानि पुनाति । जीवानां शरीरेषु प्रविश्य रोगकरं दुर्गन्धं पूतिगन्धं वा दूरीकरोति । मेघान् संघट्टयते । तेन जलं वर्षति । सान्द्रवनेषु तेजांस्युपनयति, येन तत्रत्या जन्तवो लतादयश्च जीवनीयं गृह्णन्ति । प्रचण्डः प्रकम्पनो झञ्झावातो वा समुद्रे नावो निमज्जयति । स्थले च वृक्षादीन्युन्मूलयति ।

पञ्चधा प्रसरति देहिनां शरीरेषु वायुः । स यथा—यो मुखनासिकाभ्यां गमागमं करोति स प्राणवायुः । यो जलादिकमधो नयति सोऽपानः । यो जाठरानलं धुक्षते स समानः । भोजनादेरूर्ध्वनेतोदानः । प्राणदोऽयं क्रियाशक्तिजनकोऽपि जायते प्राणिनाम् ।

वायुर्वातीति जानीमस्तस्य रूपन्न दृग्गतम् ।
विष्णो रूपं जने विष्टं यथा कार्य्येण विद्महे ॥

अर्थः—वायुः The wind. जीवनीयम् Vitalitious. पदार्थः An Object. रूपम् Colour. आकृतिः Form. वेगः Speed. प्रवाति Blows. स्पर्शः Toutching. अनुभवामः We feel त्वग् Skin. पावयति Purifies. जीवनम् Vitality. निवसन्तः Living. झषः A fish पृथक् Separated. उदधिः The sea. यादांसि The animals of water. नीरूपः Without colour. पतत्रिः A bird पक्षतिः Wings. विवरम् A hole. कार्यरूपः Working. उड्डाययति Makes to fly. अन्तरिक्षम् The sky. साधनम् Means. शोधयति Purifies. आगारम् A house. दुर्गन्धः Bad smell. दूरीकरोति Takes away. उपनयति Carries near. प्रचंडः Great. झञ्झावातः strong gale. निमज्जयति Makes to sink down. उन्मीलयति Roots out. पञ्चधा In five forms. धुक्षते Brightens. विष्टम् Entered. विद्महे We know.

व्या०—अस्मिन् पाठेऽध्यापकाः पूर्वपाठेषु पठितस्य व्याकरणविषयस्यावृत्तिम्, सरलसरलां वाक्यरचनाञ्च कारयेयुः ।

चतुस्त्रिंशः पाठः ।

शरीरम् ।

इदमस्माकं शरीरम् । शरीरे शिर उत्तमाङ्गमस्ति । शिरस्यसंख्याः शिरोरुहा भवन्ति । तदधस्ताल्ललाटम्, ततो भ्रुवौ, तयोरधस्ताद् द्वे नेत्रे स्तः । नेत्रयोः कनीनिके भवतः । ये तारके अपि कथ्येते । तारकयोरेव चक्षुरिन्द्रियं वर्तते येन रूपग्रहणं भवति ।

नयनयोरुपरि नेत्रच्छदौ भवतः । नेत्रयोरन्तराले मुखस्योपरिभागे च नासिका भवति, यस्यां गन्धग्राहकं घ्राणेन्द्रियं तिष्ठति । नासिकायाश्चाधस्तादोष्ठौ, तयोरधस्तनोऽधरो भवति । ओष्ठाधरयोरन्तराले मुखम् । तस्मिन्नुपर्यधस्ताच्च दन्तपङ्क्ती स्तः । तयोर्द्वात्रिंशद्दन्ता भवन्ति । अन्तरे जिह्वाऽस्ति, यत्र रसनेन्द्रियं तिष्ठति ।

नेत्रयोरुभयतः पार्श्वयोर्नातिदूरे श्रोत्रे स्तः । यत्र शब्दग्राहकं श्रोत्रेन्द्रियं विद्यते । तदधस्तात्कपोलौ तत्परा च हनुरस्ति । यस्यां

तरुणे वयसि श्मश्रूणि जायन्ते । स्त्रीणां तानि नोद्भवन्ति । हनोरधो ग्रीवा, तत्र गलबिलं भवति । ग्रीवामुभयतः स्कन्धौ तयोर्मूले भुजौ स्तः । तयोर्मध्यबन्धः कफोणिर्भवति । तस्योपरि प्रगण्डस्तदधस्ताच्च प्रकोष्ठः । प्रकोष्ठस्य निम्नभागे मणिबन्धस्ततः करः । द्वयोरपि करयोः पञ्चपञ्चाङ्गुल्यः सन्ति । अङ्गुलीषु नखा भवन्ति । ते पुनः पुनरुद्भवन्तीति पुनर्भुव इत्युच्यन्ते । भुजयोरधोमूले कक्षौ स्तः । तयोर्निम्नदेशे पर्शवः । पर्शूणां पञ्जरं वक्षःस्थलम्, यस्यान्तर्हृदयं तिष्ठति । तस्य पश्चाद्भागः पृष्ठम्, अधस्तूदरम्, ततः कटिस्ततश्चोरू । तयोर्ग्रन्थी घुटिके कथ्येते । तयोरधस्ताज्जानुनी, जानुचरणयोर्ग्रन्थी गुल्फौ । तयोरधः पार्ष्णी, अग्रतः प्रपदम् । तदग्रतः सनखा अङ्गुल्योऽङ्गुष्ठश्च । समग्रः कायः सूक्ष्मया त्वचा परिवेष्टितोऽस्ति । त्वचि स्पर्शेन्द्रियं तिष्ठति, येन स्पर्शज्ञानं जायते ।

शरीरं यस्य नीरोगं तस्य काः का न संपदः ।
आपदामचलास्तस्य यस्य तन्न निरामयम् ॥

अर्थः—शरीरम् The body. शिरः The head. उत्तमाङ्गम् The best part of the body. शिरोरुहः The hair. अधस्तात् Down-ward. ललाटम् The fore-head. भ्रूः The brow. कनीनिका The pupil of the eye. चक्षुः The eye. रूपम् colour. उपरि above. नेत्रच्छदः An eyelid. घ्राणम् The nose. गन्धः Fragrance. ओष्ठः A lip. अधरम् Lower-lip. दन्तः A tooth. पङ्क्तिः A line. द्वात्रिंशद् Thirty-two. जिह्वा The tongue. उभयतः At the both sides. पार्श्वम् Side. नातिदूरे Very near. श्रोत्रम् The ear. कपोलौ The cheecks. हनुः The chin. तरुणः A young man. वयः Age. श्मश्रूणि Mustaches. ग्रीवः The neck. गलबिलम् Throat. उभयतः On the both sides. स्कन्धः The shoulder. भुजः An arm. कफोणिः The elbow. प्रगण्डः The upper part of the arm. प्रकोष्ठः The part above the wrist. मणिबन्धः The wrist. अङ्गुली A finger. नखः The nail. कक्षः The arm pit. पर्शुका A rib. वक्षःस्थलम् The chest. हृदयम् The heart. पृष्ठम् The back. उदरम् The stomach. कटिः Tho waste. ऊरुः The thigh. घुटिका The knee-pan. जानु The knee. गुल्फः The ankle. पार्ष्णिः The heel. प्रपदम् The fore-part of the foot. अङ्गुष्ठः Thumb. समग्रः Whole. कायः The body. परिवेष्टितः Covered. त्वचा The skin. नीरोगम् Healthy. संपदः Prosperites. आपदः Calamities अचलः A mountain. निरामयम् Sound.

व्या०—अस्मिन् पाठेऽध्यापकाः पूर्वपाठेषु पठितस्य व्याकरणविषयस्यावृत्तिम्, सरलसरलां वाक्यरचनाञ्च कारयेयुः ।

पञ्चत्रिंशः पाठः ।

ऋतवः ।

अस्माकं देशे षड्ऋतवो भवन्ति । तत्र चैत्रवैशाखयोर्वसन्तः । ज्येष्ठाषाढयोर्ग्रीष्मः । श्रावणभाद्रपदयोर्वर्षाः । आश्विनकार्तिकयोः शरद् । मार्गपौषयोर्हेमन्तः । माघफाल्गुनयोः शिशिरः ।

वसन्तः सर्वेषु ऋतुषु श्रेष्ठः, अत एवायमृतुराज इत्युच्यते लोके । अस्मिंछता वृक्षाः पादपाश्च पुराणानि पल्लवानि त्यक्त्वा नवानि दधति, फुल्लन्ति फलानि च धारन्ति । कोकिलोऽन्ये च विहङ्गमा मधुरं कूजन्ति । मधावस्मिन् दिवसा रमणीया भवन्ति ।

ग्रीष्मे निदाघे वा सूर्यः प्रचण्डस्तपति । धूलिरुत्तप्ता जायते । घासो भस्मसाद् भवति । वायुरुष्णो वाति । पानीयमुत्तपति । शोषमायान्त्यल्पजलाशयाः । नद्यः संकोचमाचरन्ति । दीर्घा उपतापिनश्चापद्यन्ते दिवसाः । आयामिन्यो न भवन्ति यामिन्यः ।

वर्षासु सान्द्रश्यामा मेघा प्रचुराणि जलानि मुञ्चन्ति । सरांसि कासारास्तडागा नद्यो नदाः पल्वलाश्च जलेन पूर्णाः शोभन्ते । अव्यक्तरागपटवो वटव इव रटन्तः सामानीव भेका जलाशयान्तिके पङ्क्तिषु विराजन्ते । क्षेत्राणि वनानि च सस्यैर्घासैश्च हरितानि मनोहराणि च जायन्ते । व्यापारिणो नृपा यतयश्च स्वस्थास्तिष्ठन्ति । वने मयूरास्तारस्वरेण केकामाकलयन्ति । नरा नार्यश्च प्रसन्ना जायन्ते । सर्वमङ्कुरितमिवाभाति भुवस्तलम् ।

शरदि निर्मलं नीलमाकाशं चकास्ति । नद्यो नदा जलाशयाश्च स्वच्छनीरा भवन्ति । लताः पुष्पाणि धारयन्ति । वनस्पतयः परिपाकमायान्ति । न चण्डं तपति मार्तण्डः । रमणीयतमा भवन्ति चान्द्रमस्यो यामिन्यः ।

हेमन्ते हिमानी पतति । हसन्तीं सेवन्ते सायं प्रातश्च कम्बलवन्तोऽपि नागरिकाः । सङ्कोचमञ्चति कमलाकरः । मन्दमाभाति भास्करः । दीर्घा भवन्ति रात्रयः । दुश्चरितानां कीर्त्तय इव क्षीयन्ते दिवसाः । खरो वाति हैमनः पवनः ।

शिशिरे शैत्यं क्षिणोतितराम् । वसन्तोत्सवमारभन्ते जनाः । नाना क्रीडा विनोदाश्च प्रवर्तन्ते । वृक्षास्तपस्विन इव दिग्वाससो जायन्ते । औष्ण्यं शनैः शनैर्वर्धते ।

ऋतवो भारतेऽस्माकं सुलभाः षण्मनोहराः ।
द्वित्राः कदाचिदन्यत्र सौमनस्या मनोहराः ॥

अर्थः—ऋतवः The seasons. देशः A country. वसन्तः The spring season. ग्रीष्मः The summer season. वर्षाः The rainy season. शरद् The otumn. हेमन्तः The winter. शिशिरः The close of the cold season. श्रेष्ठः Pleasant and good. ऋतुराजः The prince of the seasons. नवम् New. दधति Wear upon. कोकिलः The cukoo. विहंगमाः The birds. मधुरम् Sweetly. कूजन्ति Sing. मधुः The spring season. रमणीयः Pleasant प्रचण्डः Very hot. धूलिः Dust उत्तप्ता Heated. अल्पजलाशयः A small pond. संकोचः Decreas. दीर्घः Long. उपतापिनः Unwearable. आयामिनी Long. यामिनी The night. सान्द्रश्यामा Densely blue. प्रचुराणि Plenty of. सरः A tank. कासारः A tank. भेकः A frog. अन्तिके Nearby. हरितम् Green. स्वस्थः Unconcerned. चकास्ति Looks beautiful. स्वच्छम् Clear. मार्तण्डः The sun. चान्द्रमस्यः Full of the moon light. हसन्ती A fireplace. खरः Rough. शैत्यम् The cold. क्षिणोति Becomes less. औष्ण्यम् Heat. सौमनस्यः The seasons of flowers.

व्या०—अस्मिन् पाठेऽध्यापकाः पूर्वपाठेषु पठितस्य व्याकरणविषयस्यावृत्तिम्, सरलसरलां वाक्यरचनाञ्च कारयेयुः ।

परिशिष्टम् ।

अकारान्तः पुल्लिङ्गो देवशब्दः ।

	ए०	द्वि०	बहु०
प्र०	देवः	देवौ	देवाः
द्वि०	देवम्	देवौ	देवान्
तृ०	देवेन	देवाभ्याम्	देवैः
च०	देवाय	देवाभ्याम्	देवेभ्यः
पं०	देवात्	देवाभ्याम्	देवेभ्यः
ष०	देवस्य	देवयोः	देवानाम्
स०	देवे	देवयोः	देवेषु
सं०	हे देव	हे देवौ	हे देवाः

आकारान्तः पुल्लिङ्गो विश्वपाशब्दः ।

	ए०	द्वि०	बहु०
प्र०	विश्वपाः	विश्वपौ	विश्वपाः
द्वि०	विश्वपाम्	विश्वपौ	विश्वपः
तृ०	विश्वपा	विश्वपाभ्याम्	विश्वपाभिः
च०	विश्वपे	विश्वपाभ्याम्	विश्वपाभ्यः
पं०	विश्वपः	विश्वपाभ्याम्	विश्वपाभ्यः
ष०	विश्वपः	विश्वपोः	विश्वपाम्
स०	विश्वपि	विश्वपोः	विश्वपासु
सं०	हे विश्वपाः	हे विश्वपौ	हे विश्वपाः

इकारान्तः पुल्लिङ्गो हरिशब्दः ।

	ए०	द्वि०	बहु०
प्र०	हरिः	हरी	हरयः
द्वि०	हरिम्	हरी	हरीन्
तृ०	हरिणा	हरिभ्याम्	हरिभिः
च०	हरये	हरिभ्याम्	हरिभ्यः
पं०	हरेः	हरिभ्याम्	हरिभ्यः
ष०	हरेः	हर्योः	हरीणाम्
स०	हरौ	हर्योः	हरिषु
सं०	हे हरे	हे हरी	हे हरयः

ईकारान्तः पुल्लिङ्गः सुधीशब्दः ।

	ए०	द्वि०	बहु०
प्र०	सुधीः	सुधियौ	सुधियः
द्वि०	सुधियम्	सुधियौ	सुधियः
तृ०	सुधिया	सुधीभ्याम्	सुधीभिः
च०	सुधिये	सुधीभ्याम्	सुधीभ्यः
पं०	सुधियः	सुधीभ्याम्	सुधीभ्यः
ष०	सुधियः	सुधियोः	सुधियाम्
स०	सुधियि	सुधियोः	सुधीषु
सं०	हे सुधीः	हे सुधियौ	हे सुधियः

उकारान्तः पुल्लिङ्गो भानुशब्दः ।

	ए०	द्वि०	बहु०
प्र०	भानुः	भानू	भानवः
द्वि०	भानुम्	भानू	भानून्
तृ०	भानुना	भानुभ्याम्	भानुभिः
च०	भानवे	भानुभ्याम्	भानुभ्यः
पं०	भानोः	भानुभ्याम्	भानुभ्यः
ष०	भानोः	भान्वोः	भानूनाम्
स०	भानौ	भान्वोः	भानुषु
सं०	हे भानो	हे भानू	हे भानवः

ऊकारान्तः पुल्लिङ्गः स्वभूशब्दः ।

	ए०	द्वि०	बहु०
प्र०	स्वभूः	स्वभुवौ	स्वभुवः
द्वि०	स्वभुवम्	स्वभुवौ	स्वभुवः
तृ०	स्वभुवा	स्वभूभ्याम्	स्वभूभिः
च०	स्वभुवे	स्वभूभ्याम्	स्वभूभ्यः
पं०	स्वभुवः	स्वभूभ्याम्	स्वभूभ्यः
ष०	स्वभुवः	स्वभुवोः	स्वभुवाम्
स०	स्वभुवि	स्वभुवोः	स्वभूषु
सं०	हे स्वभूः	हे स्वभुवौ	हे स्वभुवः

ऋकारान्तः पुल्लिङ्गो धातृशब्दः ।

	ए०	द्वि०	बहु०
प्र०	धाता	धातारौ	धातारः
द्वि०	धातारम्	धातारौ	धातॄन्
तृ०	धात्रा	धातृभ्याम्	धातृभिः
च०	धात्रे	धातृभ्याम्	धातृभ्यः
पं०	धातुः	धातृभ्याम्	धातृभ्यः
ष०	धातुः	धात्रोः	धातॄणाम्
स०	धातरि	धात्रोः	धातृषु
सं०	हे धातः	हे धातारौ	हे धातारः

ऋकारान्तः पुल्लिङ्गो पितृशब्दः ।

	ए०	द्वि०	बहु०
प्र०	पिता	पितरौ	पितरः
द्वि०	पितरम्	पितरौ	पितॄन्
तृ०	पित्रा	पितृभ्याम्	पितृभिः
च०	पित्रे	पितृभ्याम्	पितृभ्यः
पं०	पितुः	पितृभ्याम्	पितृभ्यः
ष०	पितुः	पित्रोः	पितॄणाम्
स०	पितरि	पित्रोः	पितृषु
सं०	हे पितः	हे पितरौ	हे पितरः

ऌकारान्तः पुल्लिङ्गो गम्ऌशब्दः ।

	ए०	द्वि०	बहु०
प्र०	गमा	गमलौ	गमलः
द्वि०	गमलम्	गमलौ	गमॢन्
तृ०	गम्ला	गम्ऌभ्याम्	गम्ऌभिः
च०	गम्ले	गम्ऌभ्याम्	गम्ऌभ्यः
पं०	गमुल्	गम्ऌभ्याम्	गम्ऌभ्यः
ष०	गमुल्	गम्ल्ोः	गम्ॡणाम्
स०	गम्लि	गम्ल्ोः	गम्ऌषु
सं०	हे गमा	हे गमलौ	हे गमलः

एकारान्तः पुल्लिङ्गः सेशब्दः ।

	ए०	द्वि०	बहु०
प्र०	सेः	सयौ	सयः
द्वि०	सयम्	सयौ	सयः
तृ०	सया	सेभ्याम्	सेभिः
च०	सये	सेभ्याम्	सेभ्यः
पं०	सेः	सेभ्याम्	सेभ्यः
ष०	सेः	सयोः	सयाम्
स०	सयि	सयोः	सेषु
सं०	हे से	हे सयौ	हे सयः

ऐकारान्तः पुल्लिङ्गो रैशब्दः ।

	ए०	द्वि०	बहु०
प्र०	राः	रायौ	रायः
द्वि०	रायम्	रायौ	रायः
तृ०	राया	राभ्याम्	राभिः
च०	राये	राभ्याम्	राभ्यः
पं०	रायः	राभ्याम्	राभ्यः
ष०	रायः	रायोः	रायाम्
स०	रायि	रायोः	रासु
सं०	हे राः	हे रायौ	हे रायः

ओकारान्तः पुल्लिङ्गो गोशब्दः ।

	ए०	द्वि०	बहु०
प्र०	गौः	गावौ	गावः
द्वि०	गाम्	गावौ	गाः
तृ०	गवा	गोभ्याम्	गोभिः
च०	गवे	गोभ्याम्	गोभ्यः
पं०	गोः	गोभ्याम्	गोभ्यः
ष०	गोः	गवोः	गवाम्
स०	गवि	गवोः	गोषु
सं०	हे गौः	हे गावौ	हे गावः

औकारान्तः पुल्लिङ्गो ग्लौशब्दः ।

	ए०	द्वि०	बहु०
प्र०	ग्लौः	ग्लावौ	ग्लावः
द्वि०	ग्लावम्	ग्लावौ	ग्लावः
तृ०	ग्लावा	ग्लौभ्याम्	ग्लौभिः
च०	ग्लावे	ग्लौभ्याम्	ग्लौभ्यः
पं०	ग्लावः	ग्लौभ्याम्	ग्लौभ्यः
ष०	ग्लावः	ग्लावोः	ग्लावाम्
स०	ग्लावि	ग्लावोः	ग्लौषु
सं०	हे ग्लौः	हे ग्लावौ	हे ग्लावः

आकारान्तः स्त्रीलिङ्गो रमाशब्दः ।

	ए०	द्वि०	बहु०
प्र०	रमा	रमे	रमाः
द्वि०	रमाम्	रमे	रमाः
तृ०	रमया	रमाभ्याम्	रमाभिः
च०	रमायै	रमाभ्याम्	रमाभ्यः
पं०	रमायाः	रमाभ्याम्	रमाभ्यः
ष०	रमायाः	रमयोः	रमाणाम्
स०	रमायाम्	रमयोः	रमासु
सं०	हे रमे	हे रमे	हे रमाः

इकारान्तः स्त्रीलिङ्गो रुचिशब्दः ।

	ए०	द्वि०	बहु०
प्र०	रुचिः	रुची	रुचयः
द्वि०	रुचिम्	रुची	रुचीः
तृ०	रुच्या	रुचिभ्याम्	रुचिभिः
च०	रुच्यै रुचये	रुचिभ्याम्	रुचिभ्यः
पं०	रुच्याः रुचेः	रुचिभ्याम्	रुचिभ्यः
ष०	रुच्याः रुचेः	रुच्योः	रुचीनाम्
स०	रुच्याम् रुचौ	रुच्योः	रुचिषु
सं०	हे रुचे	हे रुची	हे रुचयः

ईकारान्तः स्त्रीलिङ्गो नदीशब्दः ।

	ए०	द्वि०	बहु०
प्र०	नदी	नद्यौ	नद्यः
द्वि०	नदीम्	नद्यौ	नदीः
तृ०	नद्या	नदीभ्याम्	नदीभिः
च०	नद्यै	नदीभ्याम्	नदीभ्यः
पं०	नद्याः	नदीभ्याम्	नदीभ्यः
ष०	नद्याः	नद्योः	नदीनाम्
स०	नद्याम्	नद्योः	नदीषु
सं०	हे नदि	हे नद्यौ	हे नद्यः

उकारान्तः स्त्रीलिङ्गो धेनुशब्दः ।

	ए०	द्वि०	बहु०
प्र०	धेनुः	धेनू	धेनवः
द्वि०	धेनुम्	धेनू	धेनूः
तृ०	धेन्वा	धेनुभ्याम्	धेनुभिः
च०	धेन्वै, धेनवे	धेनुभ्याम्	धेनुभ्यः
पं०	धेन्वाः धेनोः	धेनुभ्याम्	धेनुभ्यः
ष०	धेन्वाः धेनोः	धेन्वोः	धेनूनाम्
स०	धेन्वाम् धेनौ	धेन्वोः	धेनुषु
सं०	हे धेनो	हे धेनू	हे धेनवः

ऊकारान्तः स्त्रीलिङ्गश्चमूशब्दः ।

	ए०	द्वि०	बहु०
प्र०	चमूः	चम्वौ	चम्वः
द्वि०	चमूम्	चम्वौ	चमूः
तृ०	चम्वा	चमूभ्याम्	चमूभिः
च०	चम्वै	चमूभ्याम्	चमूभ्यः
पं०	चम्वाः	चमूभ्याम्	चमूभ्यः
ष०	चम्वाः	चम्वोः	चमूनाम्
स०	चम्वाम्	चम्वोः	चमूषु
सं०	हे चमु	हे चम्वौ	हे चम्वः

ऋकारान्तः स्त्रीलिङ्गः स्वसृशब्दः ।

	ए०	द्वि०	बहु०
प्र०	स्वसा	स्वसारौ	स्वसारः
द्वि०	स्वसारम्	स्वसारौ	स्वसॄः
तृ०	स्वस्रा	स्वसृभ्याम्	स्वसृभिः
च०	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः
पं०	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः
ष०	स्वसुः	स्वस्रोः	स्वसॄणाम्
स०	स्वसरि	स्वस्रोः	स्वसृषु
सं०	हे स्वसः	हे स्वसारौ	हे स्वसारः

ऋकारान्तः स्त्रीलिङ्गो मातृशब्दः ।

	ए०	द्वि०	बहु०
प्र०	माता	मातरौ	मातरः
द्वि०	मातरम्	मातरौ	मातॄः
तृ०	मात्रा	मातृभ्याम्	मातृभिः
च०	मात्रे	मातृभ्याम्	मातृभ्यः
पं०	मातुः	मातृभ्याम्	मातृभ्यः
ष०	मातुः	मात्रोः	मातॄणाम्
स०	मातरि	मात्रोः	मातृषु
सं०	हे मातः	हे मातरौ	हे मातरः

ओकारान्तः स्त्रीलिङ्गो द्योशब्दः

	ए०	द्वि०	बहु०
प्र०	द्यौः	द्यावौ	द्यावः
द्वि०	द्याम्	द्यावौ	द्याः
तृ०	द्यवा	द्योभ्याम्	द्योभिः
च०	द्यवे	द्योभ्याम्	द्योभ्यः
पं०	द्योः	द्योभ्याम्	द्योभ्यः
ष०	द्योः	द्यवोः	द्यवाम्
स०	द्यवि	द्यवोः	द्योषु
सं०	हे द्यौः	हे द्यावौ	हे द्यावः

औकारान्तः स्त्रीलिङ्गो नौशब्दः ।

	ए०	द्वि०	बहु०
प्र०	नौः	नावौ	नावः
द्वि०	नावम्	नावौ	नावः
तृ०	नावा	नौभ्याम्	नौभिः
च०	नावे	नौभ्याम्	नौभ्यः
पं०	नावः	नौभ्याम्	नौभ्यः
ष०	नावः	नावोः	नावाम्
स०	नावि	नावोः	नौषु
सं०	हे नौः	हे नावौ	हे नावः

नपुंसकलिङ्गो ज्ञानशब्दः ।

	ए०	द्वि०	बहु०
प्र०	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वि०	ज्ञानम्	ज्ञाने	ज्ञानानि
तृ०	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
च०	ज्ञानाय	ज्ञानाभ्याम्	ज्ञानेभ्यः
पं०	ज्ञानात्	ज्ञानाभ्याम्	ज्ञानेभ्यः
ष०	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
स०	ज्ञाने	ज्ञानयोः	ज्ञानेषु
सं०	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

इकारान्तः नपुंसकलिङ्गो दधिशब्दः ।

	ए०	द्वि०	बहु०
प्र०	दधि	दधिनी	दधीनि
द्वि०	दधि	दधिनी	दधीनि
तृ०	दध्ना	दधिभ्याम्	दधिभिः
च०	दध्ने	दधिभ्याम्	दधिभ्यः
पं०	दध्नः	दधिभ्याम्	दधिभ्यः
ष०	दध्नः	दध्नोः	दध्नाम्
स०	दध्नि, दधनि	दध्नोः	दधिषु
सं०	हे दधि, दध्ने	हे दधिनी	हे दधीनि

उकारान्तो नपुंसकलिङ्गो मधुशब्दः ।

	ए०	द्वि०	बहु०
प्र०	मधु	मधुनी	मधूनि
द्वि०	मधु	मधुनी	मधूनि
तृ०	मधुना	मधुभ्याम्	मधुभिः
च०	मधुने	मधुभ्याम्	मधुभ्यः
पं०	मधुनः	मधुभ्याम्	मधुभ्यः
ष०	मधुनः	मधुनोः	मधूनाम्
स०	मधुनि	मधुनोः	मधुषु
सं०	हे मधो	हे मधु हे मधुनी	हे मधूनि

हकारान्तपुंलिङ्गो लिह्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	लिट्-ड्	लिहौ	लिहः
द्वि०	लिहम्	लिहौ	लिहः
तृ०	लिहा	लिड्भ्याम्	लिड्भिः
च०	लिहे	लिड्भ्याम्	लिड्भ्यः
पं०	लिहः	लिड्भ्याम्	लिड्भ्यः
ष०	लिहः	लिहोः	लिहाम्
स०	लिहि	लिहोः	लिट्त्सु लिट्सु
सं०	हे लिट्-ड्	हे लिहौ	हे लिहः

क्लीबो धातृशब्दः ।

	ए०	द्वि०	बहु०
प्र०	धातृ	धातृणी	धातृणि
द्वि०	धातृ	धातृणी	धातृणि
तृ०	धातृणा	धातृभ्याम्	धातृभिः
च०	धातृणे	धातृभ्याम्	धातृभ्यः
पं०	धातृणः	धातृभ्याम्	धातृभ्यः
ष०	धातृणः	धातृणोः	धातृणाम्
स०	धातृणि	धातृणोः	धातृषु
सं०	हे धातृ धातः	हे धातृणी	हे धातृणि

पुमन् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	पुमान्	पुमांसौ	पुमांसः
द्वि०	पुमांसम्	पुमांसौ	पुंसः
तृ०	पुंसा	पुंभ्याम्	पुंभिः
च०	पुंसे	पुंभ्याम्	पुंभ्यः
पं०	पुंसः	पुंभ्याम्	पुंभ्यः
ष०	पुंसः	पुंसोः	पुंसाम्
स०	पुंसि	पुंसोः	पुंषु
सं०	हे पुमन्	हे पुमांसौ	हे पुमांसः

नपुंसक प्ररैशब्दः ।

	ए०	द्वि०	बहु०
प्र०	प्ररि	प्ररिणी	प्ररीणि
द्वि०	प्ररि	प्ररिणी	प्ररीणि
तृ०	प्ररिणा	प्रराभ्याम्	प्ररभिः
च०	प्ररिणे	प्रराभ्याम्	प्रराभ्यः
पं०	प्ररिणः	प्रराभ्याम्	प्रराभ्यः
ष०	प्ररिणः	प्ररिणोः	प्ररीणाम्
स०	प्ररिणि	प्ररिणोः	प्रराषु
सं०	प्ररि	हे प्ररिणी	हे प्ररीणि

विद्वन् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	विद्वान्	विद्वांसौ	विद्वांसः
द्वि०	विद्वांसम्	विद्वांसौ	विदुषः
तृ०	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
च०	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पं०	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
ष०	विदुषः	विदुषोः	विदुषाम्
स०	विदुषि	विदुषोः	विद्वत्सु
सं०	हे विद्वन्	हे विद्वांसौ	हे विद्वांसः

अनड्वन् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	अनड्वान्	अनड्वाहौ	अनड्वाहः
द्वि०	अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ०	अनडुहा	अनड्वद्भ्याम्	अनड्वद्भिः
च०	अनडुहे	अनड्वद्भ्याम्	अनड्वद्भ्यः
पं०	अनडुहः	अनड्वद्भ्याम्	अनड्वद्भ्यः
ष०	अनडुहः	अनडुहोः	अनडुहाम्
स०	अनडुहि	अनडुहोः	अनडुत्सु
सं०	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

पयोमुक् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	पयोमुक्-ग्	पयोमुचौ	पयोमुचः
द्वि०	पयोमुचम्	पयोमुचौ	पयोमुचः
तृ०	पयोमुचा	पयोमुग्भ्याम्	पयोमुग्भिः
च०	पयोमुचे	पयोमुग्भ्याम्	पयोमुग्भ्यः
पं०	पयोमुचः	पयोमुग्भ्याम्	पयोमुग्भ्यः
ष०	पयोमुचः	पयोमुचोः	पयोमुचाम्
स०	पयोमुचि	पयोमुचोः	पयोमुक्षु
सं०	हे पयोमुक्-ग्	हेपयोमुचौ	हे पयोमुचः

चन्द्रमस्-शब्दः ।

	ए०	द्वि०	बहु०
प्र०	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
द्वि०	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
तृ०	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
च०	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
पं०	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
ष०	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
स०	चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु
सं०	हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः

युवन् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	युवा	युवानौ	युवानः
द्वि०	युवानम्	युवानौ	यूनः
तृ०	यूना	युवभ्याम्	युवभिः
च०	यूने	युवभ्याम्	युवभ्यः
पं०	यूनः	युवभ्याम्	युवभ्यः
ष०	यूनः	यूनोः	यूनाम्
स०	यूनि	यूनोः	युवसु
सं०	हे युवन्	हे युवानौ	हे युवानः

भवत् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	भवान्	भवन्तौ	भवन्तः
द्वि०	भवन्तम्	भवन्तौ	भवतः
तृ०	भवता	भवद्भ्याम्	भवद्भिः
च०	भवते	भवद्भ्याम्	भवद्भ्यः
पं०	भवतः	भवद्भ्याम्	भवद्भ्यः
ष०	भवतः	भवतोः	भवताम्
स०	भवति	भवतोः	भवत्सु

करिन् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	करी	करिणौ	करिणः
द्वि०	करिणम्	करिणौ	करिणः
तृ०	करिणा	करिभ्याम्	करिभिः
च०	करिणे	करिभ्याम्	करिभ्यः
पं०	करिणः	करिभ्याम्	करिभ्यः
ष०	करिणः	करिणोः	करिणाम्
स०	करिणि	करिणोः	करिषु
सं०	हे करिन्	हे करिणौ	हे करिणः

हलन्तस्त्रीलिङ्गो दिव्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	द्यौः	दिवौ	दिवः
द्वि०	दिवम्	दिवौ	दिवः
तृ०	दिवा	द्युभ्याम्	द्युभिः
च०	दिवे	द्युभ्याम्	द्युभ्यः
पं०	दिवः	द्युभ्वाम्	द्युभ्यः
ष०	दिवः	दिवोः	दिवाम्
स०	दिवि	दिवोः	द्युषु
सं०	हे द्यौः	हे दिवौ	हे दिवः

उपानत् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	उपानत्-द्	उपानहौ	उपानहः
द्वि०	उपानहम्	उपानहौ	उपानहः
तृ०	उपानहा	उपानद्भ्याम्	उपानद्भिः
च०	उपानहे	उपानद्भ्याम्	उपानद्भ्यः
पं०	उपानहः	उपानद्भ्याम्	उपानद्भ्यः
ष०	उपानहः	उपानहोः	उपानहाम्
स०	उपानहि	उपानहोः	उपानत्सु
सं०	हे उपानत्-द्	हे उपानहौ	हे उपानहः

गिर्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	गीः	गिरौ	गिरः
द्वि०	गिरम्	गिरौ	गिरः
तृ०	गिरा	गीर्भ्याम्	गीर्भिः
च०	गिरे	गीर्भ्याम्	गीर्भ्यः
पं०	गिरः	गीर्भ्याम्	गीर्भ्यः
ष०	गिरः	गिरोः	गिराम्
स०	गिरि	गिरोः	गीर्षु
सं०	हे गीः	हे गिरौ	हे गिरः

दिक्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	दिक्-ग्	दिशौ	दिशः
द्वि०	दिशम्	दिशौ	दिशः
तृ०	दिशा	दिग्भ्याम्	दिग्भिः
च०	दिशे	दिग्भ्याम्	दिग्भ्यः
पं०	दिशः	दिग्भ्याम्	दिग्भ्यः
ष०	दिशः	दिशोः	दिशाम्
स०	दिशि	दिशोः	दिक्षु
सं०	हे दिक्-ग्	हे दिशौ	हे दिशः

वाक् शब्दः ।

	ए०	द्वि०	बहु०
प्र०	वाक्-ग्	वाचौ	वाचः
द्वि०	वाचम्	वाचौ	वाचः
तृ०	वाचा	वाग्भ्याम्	वाग्भिः
च०	वाचे	वाग्भ्याम्	वाग्भ्यः
पं०	वाचः	वाग्भ्याम्	वाग्भ्यः
ष०	वाचः	वाचोः	वाचाम्
स०	वाचि	वाचोः	वाक्षु
सं०	हे वाक्-ग्	हे वाचौ	हे वाचः

शकृत्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	शकृत्	शकृतौ	शकृतः
द्वि०	शकृतम्	शकृतौ	शकृतः
तृ०	शकृता	शकृद्भ्याम्	शकृद्भिः
च०	शकृते	शकृद्भ्याम्	शकृद्भ्यः
पं०	शकृतः	शकृद्भ्याम्	शकृद्भ्याम्
ष०	शकृतः	शकृतोः	शकृताम्
स०	शकृति	शकृतोः	शकृत्सु
सं०	हे शकृत्	हे शकृतौ	हे शकृतः

हलन्तनपुंसकलिङ्गशब्दाः ।

अहस्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	अहः	अह्नी अहनी	अहानि
द्वि०	अहः	अह्नी अहनी	अहानि
तृ०	अह्ना	अहोभ्याम्	अहोभिः
च०	अह्ने	अहोभ्याम्	अहोभ्यः
पं०	अह्नः	अहोभ्याम्	अहोभ्यः
ष०	अह्नः	अह्नोः	अह्नाम्
स०	अह्नि, अहनि	अह्नोः	अहःसु
सं०	हे अहः	हे अह्नी अहनी	हे अहानि

धनुस्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	धनुः	धनुषी	धनूंषि
द्वि०	धनुः	धनुषी	धनूंषि
तृ०	धनुषा	धनुर्भ्याम्	धनुर्भिः
च०	धनुषे	धनुर्भ्याम्	धनुर्भ्यः
पं०	धनुषः	धनुर्भ्याम्	धनुर्भ्यः
ष०	धनुषः	धनुषोः	धनुषाम्
स०	धनुषि	धनुषोः	धनुःषु
सं०	हे धनुः	हे धनुषी	हे धनूंषि

पयस्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	पयः	पयसी	पयांसि
द्वि०	पयः	पयसी	पयांसि
तृ०	पयसा	पयोभ्याम्	पयोभिः
च०	पयसे	पयोभ्याम्	पयोभ्यः
पं०	पयसः	पयोभ्याम्	पयोभ्यः
ष०	पयसः	पयसोः	पयसाम्
स०	पयसि	पयसोः	पयःसु
सं०	हे पयः	हे पयसी	हे पयांसि

मनस्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	मनः	मनसी	मनांसि
द्वि०	मनः	मनसी	मनांसि
तृ०	मनसा	मनोभ्याम्	मनोभिः
च०	मनसे	मनोभ्याम्	मनोभ्यः
पं०	मनसः	मनोभ्याम्	मनोभ्यः
ष०	मनसः	मनसोः	मनसाम्
स०	मनसि	मनसोः	मनःसु
सं०	हे मनः	हे मनसी	हे मनांसि

सर्वनामशब्दाः ।

तत्राकारान्तपुल्लिङ्गः सर्वशब्दः ।

	ए०	द्वि०	बहु०
प्र०	सर्वः	सर्वौ	सर्वे
द्वि०	सर्वम्	सर्वौ	सर्वान्
तृ०	सर्वेण	सर्वाभ्याम्	सर्वैः
च०	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पं०	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
ष०	सर्वस्य	सर्वयोः	सर्वेषाम्
स०	सर्वस्मिन्	सर्वयोः	सर्वेषु
सं०	हे सर्व	हे सर्वौ	हे सर्वे

हलन्तपुल्लिङ्गस्तच्छब्दः ।

	ए०	द्वि०	बहु०
प्र०	सः	तौ	ते
द्वि०	तम्	तौ	तान्
तृ०	तेन	ताभ्याम्	तैः
च०	तस्मै	ताभ्याम्	तेभ्यः
पं०	तस्मात्	ताभ्याम्	तेभ्यः
ष०	तस्य	तयोः	तेषाम्
स०	तस्मिन्	तयोः	तेषु

यत्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	यः	यौ	ये
द्वि०	यम्	यौ	यान्
तृ०	येन	याभ्याम्	यैः
च०	यस्मै	याभ्याम्	येभ्यः
पं०	यस्मात्	याभ्याम्	येभ्यः
ष०	यस्य	ययोः	येषाम्
स०	यस्मिन्	ययोः	येषु

एतच्छब्दः ।

	ए०	द्वि०	बहु०
प्र०	एषः	एतौ	एते
द्वि०	एतम् एनम्	एतौ एनौ	एतान् एनान्
तृ०	एतेन एनेन	एताभ्याम्	एतैः
च०	एतस्मै	एताभ्याम्	एतेभ्यः
पं०	एतस्मात्	एताभ्याम्	एतेभ्यः
ष०	एतस्य	एतयोः एनयोः	एतेषाम्
स०	एतस्मिन्	एतयोः एनयोः	एतेषु

इदंशब्दः ।

	ए०	द्वि०	बहु०
प्र०	अयम्	इमौ	इमे
द्वि०	इमम् एनम्	इमौ एनौ	इमान् एनान्
तृ०	अनेन एनेन	आभ्याम्	एभिः
च०	अस्मै	आभ्याम्	एभ्यः
पं०	अस्मात्	आभ्याम्	एभ्यः
ष०	अस्य	अनयोः एनयोः	एषाम्
स०	अस्मिन्	अनयोः एनयोः	एषु

अदस्शब्दः ।

	ए०	द्वि०	बहु०
प्र०	असौ	अमू	अमी
द्वि०	अमुम्	अमू	अमून्
तृ०	अमुना	अमूभ्याम्	अमीभिः
च०	अमुष्मै	अमूभ्याम्	अमीभ्यः
पं०	अमुष्मात्	अमूभ्याम्	अमीभ्यः
ष०	अमुष्य	अमुयोः	अमीषाम्
स०	अमुष्मिन्	अमुयोः	अमीषु

अन्यशब्दः ।

	ए०	द्वि०	बहु०
प्र०	अन्यः	अन्यौ	अन्ये
द्वि०	अन्यम्	अन्यौ	अन्यान्
तृ०	अन्येन	अन्याभ्याम्	अन्यैः
च०	अन्यस्मै	अन्याभ्याम्	अन्येभ्यः
पं०	अन्यस्मात्	अन्याभ्याम्	अन्येभ्यः
ष०	अन्यस्य	अन्ययोः	अन्येषाम्
स०	अन्यस्मिन्	अन्ययोः	अन्येषु

उभयशब्दः ।

प्र०	उभयः उभये
द्वि०	उभयम् उभयान्
तृ०	उभयेन उभयैः
च०	उभयस्मै उभयेभ्यः
पं०	उभयस्मात् उभयेभ्यः
ष०	उभयस्य उभयेषाम्
स०	उभयस्मिन् उभयेषु
सं०	हे उभय हे उभये

एकशब्दः । द्विशब्दः ।

प्र०	एकः	द्वौ
द्वि०	एकम्	द्वौ
तृ०	एकेन	द्वाभ्याम्
च०	एकस्मै	द्वाभ्याम्
पं०	एकस्मात्	द्वाभ्याम्
ष०	एकस्य	द्वयोः
स०	एकस्मिन्	द्वयोः

त्रिषु समानोऽस्मच्छब्दः ।

	ए०	द्वि०	बहु०
प्र०	अहम्	आवाम्	वयम्
द्वि०	मां मा	आवाम् नौ	अस्मान् नः
तृ०	मया	आवाभ्याम्	अस्माभिः
च०	मह्यम् मे	आवा० नौ	अस्मभ्यम् नः
पं०	मत्	आवाभ्याम्	अस्मत्
ष०	मम मे	आवयोः नौ	अस्माकम् नः
स०	मयि	आवयोः	अस्मासु

त्रिषु समानो युष्मच्छब्दः ।

	ए०	द्वि०	बहु०
प्र०	त्वम्	युवाम्	यूयम्
द्वि०	त्वां त्वा	युवाम् वाम्	युष्मान् वः
तृ०	त्वया	युवाभ्याम्	युष्माभिः
च०	तुभ्यम् ते	युवा० वाम्	युष्मभ्यम् वः
पं०	त्वत्	युवाभ्याम्	युष्मत्
ष०	तव, ते	युव० वाम्	युष्माकम् वः
स०	त्वयि	युवयोः	युष्मासु

तिङन्तम् ।

तत्र सत्तार्थको भ्वादिगणी भू-धातुः

वर्तमाने लट् ।

प्र०	भवति	भवतः	भवन्ति
म०	भवसि	भवथः	भवथ
उ०	भवामि	भवावः	भवामः

परोक्षे लिट् ।

प्र०	बभूव	बभूवतुः	बभूवुः
म०	बभूविथ	बभूवथुः	बभूव
उ०	बभूव	बभूविव	बभूविम

अनद्यतनभविष्यति लुट् ।

प्र०	भविता	भवितारौ	भवितारः
म०	भवितासि	भवितास्थः	भवितास्थ
उ०	भवितास्मि	भवितास्वः	भवितास्मः

सामान्यभविष्यति लृट् ।

प्र०	भविष्यति	भविष्यतः	भविष्यन्ति
म०	भविष्यसि	भविष्यथः	भविष्यथ
उ०	भविष्यामि	भविष्यावः	भविष्यामः

विध्याद्यर्थेषु लोट् ।

प्र०	भवतु, भवतात्	भवताम्	भवन्तु
म०	भव, भवतात्	भवतम्	भवत
उ०	भवानि	भवाव	भवाम

अनद्यतनभूते लङ् ।

प्र०	अभवत्	अभवताम्	अभवन्
म०	अभवः	अभवतम्	अभवत
उ०	अभवम्	अभवाव	अभवाम

विधौ लिङ् ।

प्र०	भवेत्	भवेताम्	भवेयुः
म०	भवेः	भवेतम्	भवेत
उ०	भवेयम्	भवेव	भवेम

आशिषि लिङ् ।

प्र०	भूयात्	भूयास्ताम्	भूयासुः
म०	भूयाः	भूयास्तम्	भूयास्त
उ०	भूयासम्	भूयास्व	भूयास्म

भूते लुङ् ।

प्र०	अभूत्	अभूताम्	अभूवन्
म०	अभूः	अभूतम्	अभूत
उ०	अभूवम्	अभूविम	अभूविम

हेतुहेतुमद्भावे लृङ् ।

अभविष्यत्	अभविष्यताम्	अभविष्यन्	
अभविष्यः	अभविष्यतम्	अभविष्यत	
अभविष्यम्	अभविष्याव	अभविष्याम	

अदादिगणीयोऽद् भक्षणे धातुः ।

लट् ।

प्र०	अत्ति	अत्तः	अदन्ति
म०	अत्सि	अत्थः	अत्थ
उ०	अद्मि	अद्वः	अद्मः

लिट् ।

प्र०	आद	आदतुः	आदुः
म०	आदिथ	आदथुः	आद
उ०	आद	आदिव	आदिम

पक्षे ।

प्र०	जघास	जक्षतुः	जक्षुः
म०	जघसिथ	जक्षथुः	जक्ष
उ०	जघास ज० जक्षिव		जक्षिम

लुट् ।

प्र० अत्ता	अत्तारौ	अत्तारः
म० अत्तासि	अत्तास्थः	अत्तास्थ
उ० अत्तास्मि	अत्तास्व	अत्तास्म

लृट् ।

प्र० अत्स्यति	अत्स्यतः	अत्स्यन्ति
म० अत्स्यसि	अत्स्यथः	अत्स्यथ
उ० अत्स्यामि	अत्स्याव	अत्स्यामः

लोट् ।

प्र० अत्तु अत्तात्	अत्ताम्	अदन्तु
म० अद्धि ,,	अत्तम्	अत्त
उ० अदानि	अदाव	अदाम

लङ् ।

प्र० आदत्	आत्ताम्	आदन्
म० आदः	आत्तम्	आत्त
उ० आदम्	आद्व	आद्म

विधौ लिङ् ।

प्र० अद्यात्	अद्याताम्	अद्युः
म० अद्याः	अद्यातम्	अद्यात
उ० अद्याम्	अद्याव	अद्याम

आशिषि लिङ् ।

प्र० अद्यात्	अद्यास्ताम्	अद्यासुः
म० अद्याः	अद्यास्तम्	अद्यास्त
उ० अद्यासम्	अद्यास्व	अद्यास्म

लुङ् ।

प्र० अघसत्	अघसताम्	अघसन्
म० अघसः	अघसतम्	अघसत
उ० अघसम्	अघसाव	अघसाम

लृङ् ।

आत्स्यत्	आत्स्यताम्	आत्स्यन्
आत्स्यः	आत्स्यतम्	आत्स्यत
आत्स्यम्	आत्स्याव	आत्स्याम

जुहोत्यादिगणीयो हु दानादनयोः धातुः ।

लट् ।

प्र० जुहोति	जुहुतः	जुह्वति
म० जुहोसि	जुहुथः	जुहुथ
उ० जुहोमि	जुहुवः	जुहुमः

लिट् ।

जुहवाञ्चकार	जुहवाञ्चक्रतुः	जुहवाञ्चक्रुः
जुहवाञ्चकर्थ	जुहवाञ्चक्रतुः	जुहवाञ्चक्र
जुहवाञ्चकार	जुहवाञ्चकृव	जुहवाञ्चकृम

लुट् ।

प्र० होता	होतारौ	होतारः
म० होतासि	होतास्थः	होतास्थ
उ० होतास्मि	होतास्वः	होतास्मः

लृट् ।

प्र० होष्यति	होष्यतः	होष्यन्ति
म० होष्यसि	होष्यथः	होष्यथ
उ० होष्यामि	होष्यावः	होष्यामः

लोट् ।

प्र० जुहोतु	जुहुतात् जुहुताम्	जुह्वतु
म० जुहुधि	जुहुतात् जुहुतम्	जुहुत
उ० जुहवानि	जुहवाव	जुहवाम

लङ् ।

प्र० अजुहोत्	अजुहुताम्	अजुहवुः
म० अजुहोः	अजुहुतम्	अजुहुत
उ० अजुहवम्	अजुहाव	अजुहाम

विधौ लिङ् ।

प्र० जुहुयात्	जुहुयाताम्	जुह्युः
म० जुहुयाः	जुहुयातम्	जुहुयात
उ० जुहुयाम्	जुहुयाव	जुहुयाम

आशिषि लिङ् ।

प्र० हूयात्	हूयास्ताम्	हूयासुः
म० हूयाः	हूयास्तम्	हूयास्त
उ० हूयासम्	हूयास्व	हूयास्म

लुङ् ।

प्र० अहौषीत्	अहौष्टाम्	अहौषुः
म० अहौषीः	अहौष्टम्	अहौष्ट
उ० अहौषम्	अहौष्व	अहौष्म

लृङ् ।

प्र० अहोष्यत्	अहोष्यताम्	अहोष्यत्
म० अहोष्यः	अहोष्यतम्	अहोष्यत
उ० अहोष्यम्	अहोष्याव	अहोष्याम

दिवादिगणीयो दिवुधातुः ।
क्रीडाविजिगीषाव्यवहारद्युतिस्तुति-
मोदमदस्वप्नकान्तिगतिषु ।

लट् ।

प्र० दीव्यति	दीव्यतः	दीव्यन्ति
म० दीव्यसि	दीव्यथः	दीव्यथ
उ० दीव्यामि	दीव्यावः	दीव्यामः

लिट् ।

प्र० दिदेव	दिदिवतुः	दिदिवुः
म० दिदेविथ	दिदिवथुः	दिदिव
उ० दिदेव	दिदिविव	दिदिविम

लुट् ।

प्र० देविता	देवितारौ	देवितारः
म० देवितासि	देवितास्थः	देवितास्थ
उ० देवितास्मि	देवितास्वः	देवितास्मः

लृट् ।

प्र० देविष्यति	देविष्यतः	देविष्यन्ति
म० देविष्यसि	देविष्यथः	देविष्यथ
उ० देविष्यामि	देविष्यावः	देविष्यामः

लोट् ।

दीव्यतु	दीव्यतात्	दीव्यताम् दीव्यन्तु
दीव्य	दीव्यतात्	दीव्यतम् दीव्यत
दीव्यानि		दीव्याव दीव्याम

लङ् ।

प्र० अदीव्यत्	अदीव्यताम्	अदीव्यन्
म० अदीव्यः	अदीव्यतम्	अदीव्यत
उ० अदीव्यम्	अदीव्याव	अदीव्याम

विधौ लिङ् ।

प्र० दीव्येत्	दीव्येताम्	दीव्येयुः
म० दीव्येः	दीव्येतम्	दीव्येत
उ० दीव्येयम्	दीव्येव	दीव्येम

आशिषि लिङ् ।

प्र० दीव्यात्	दीव्यास्ताम्	दीव्यासुः
म० दीव्याः	दीव्यास्तम्	दीव्यास्त
उ० दीव्यासम्	दीव्यास्व	दीव्यास्म

लुङ् ।

प्र० अदेवीत्	अदेविष्टाम्	अदेविषुः
म० अदेवीः	अदेविष्टम्	अदेविष्ट
उ० अदेविषम्	अदेविष्व	अदेविष्म

लृङ् ।

प्र० अदेविष्यत्	अदेविष्यतां	अदेविष्यन्
म० अदेविष्यः	अदेविष्यतं	अदेविष्यत
उ० अदेविष्यम्	अदेविष्याव	अदेविष्याम

स्वादिगणीयः षुञ् धातुः ।
परस्मैपदे लट् ।

प्र० सुनोति	सुनुतः	सुन्वन्ति
म० सुनोषि	सुनुथः	सुनुथ
उ० सुनोमि	सुनुवः / सुन्वः	सुनुमः / सुन्मः

आत्मनेपदे लट् ।

प्र० सुनुते	सुन्वाते	सुन्वते
म० सुनुषे	सुन्वाथे	सुनुध्वे
उ० सुन्वे	सुनुवहे / सुन्वहे	सुनुमहे / सुन्महे

पर० लिट्

प्र० सुषाव	सुषुवतुः	सुषुवुः
म० सुषुविथ सुषोथ	सुषुवथुः	सुषुव
उ० सुषाव सुषुव	सुषुविव	सुषुविम

आ० लिट्

प्र० सुषुवे	सुषुवाते	सुषुविरे
म० सुषुविषे	सुषुवाथे	सुषुविध्वे
उ० सुषुवे	सुषुविवहे	सुषुविमहे

पर० लुट्

प्र० सोता	सोतारौ	सोतारः
म० सोतासि	सोतास्थः	सोतास्थ
उ० सोतास्मि	सोतास्वः	सोतास्मः

आ० लुट्

प्र० सोता	सोतारौ	सोतारः
म० सोतासे	सोतासाथे	सोताध्वे
उ० सोताहे	सोतास्वहे	सोतास्महे

पर० लृट्

प्र० सोष्यति	सोष्यतः	सोष्यन्ति
म० सोष्यसि	सोष्यथः	सोष्यथ
उ० सोष्यामि	सोष्यावः	सोष्यामः

आ० लृट्

प्र० सोष्यते	सोष्येते	सोष्यन्ते
म० सोष्यसे	सोष्येथे	सोष्यध्वे
उ० सोष्ये	सोष्यावहे	सोष्यामहे

पर० लोट्

प्र० सुनोतु सुनुतात्	सुनुताम्	सुन्वन्तु
म० सुनु सुनुतात्	सुनुतम्	सुनुत
उ० सुनवानि	सुनवाव	सुनवाम

आ० लोट्

प्र० सुनुताम्	सुन्वाताम्	सुन्वताम्
म० सुनुष्व	सुन्वाथाम्	सुनुध्वम्
उ० सुनवै	सुनुवावहै	सुनुवामहै

पर० लङ्

प्र० असुनोत्	असुनुताम्	असुन्वन्
म० असुनोः	असुनुतम्	असुनुत
उ० असुनवम्	असुनुवाव	असुनुवाम

आ० लङ्

प्र० असुनुत	असुन्वाताम्	असुन्वत
म० असुनुथाः	असुन्वाथाम्	असुनुध्वम्
उ० असुनुवे	असुनुवहे असुन्वहे	असुनुमहे असुन्महे

पर० विधौ लिङ्

प्र० सुनुयात्	सुनुयाताम्	सुनुयुः
म० सुनुयाः	सुनुयातम्	सुनुयात
उ० सुनुयाम्	सुनुयाव	सुनुयाम

आ० विधौ लिङ्

प्र० सुनुयीत	सुनुयीताम्	सुनुयीरन्
म० सुनुयीथाः	सुनुयीथाम्	सुनुयीध्वम्
उ० सुनुयीय	सनुयीवहि	सुनुयीमहि

प० आशिषि लिङ्

प्र० सूयात्	सूयास्ताम्	सूयासुः
म० सूयाः	सूयास्तम्	सूयास्त
उ० सूयासम्	सूयास्व	सूयास्म

आ० आशिषि लिङ्

सुनुषीष्ट	सुनुषीयास्ताम्	सुनुषीरन्
सुनुषीष्ठाः	सुनुषीयास्थाम्	सुनुषीध्वम्
सुनुषीय	सुनुषीवहि	सुनुषीमहि

पर० लुङ्

प्र० असावीत्	असाविष्टाम्	असाविषुः
म० असावीः	असाविष्टम्	असाविष्ट
उ० असाविषम्	असाविष्व	असाविष्म

आ० लुङ्

प्र० असोष्ट	असोषाताम्	असोषत
म० असोष्ठाः	असोषाथाम्	असोढ्वम्
उ० असोषि	असोष्वहि	असोष्महि

तुदादिगणीयस्तुदव्यथने धातुः ।

पर० लट्

प्र० तुदति	तुदतः	तुदन्ति
म० तुदसि	तुदथः	तुदथ
उ० तुदामि	तुदावः	तुदामः

आ० लट्

प्र० तुदते	तुदाते	तुदन्ते
म० तुदसे	तुदाथे	तुदध्वे
उ० तुदे	तुदावहे	तुदामहे

पर० लिट्

प्र० तुतोद	तुतुदतुः	तुतुदुः
म० तुतोदिथ	तुतुदथुः	तुतुद
उ० तुतोद	तुतुदिव	तुतुदिम

आ० लिट्

प्र० तुतुदे	तुतुदाते	तुतुदिरे
म० तुतुदिषे	तुतुदाथे	तुतुदिध्वे
उ० तुतुदे	तुतुदिवहे	तुतुदिमहे

पर० लुट्

प्र० तोत्ता	तौत्तारौ	तोत्तारः
म० तोत्तासि	तोत्तास्थः	तोत्तास्थ
उ० तोत्तास्मि	तोत्तास्वः	तोत्तास्मः

आ० लुट्

प्र० तोत्ता	तोत्तारौ	तोत्तारः
म० तोत्तासे	तोत्तासाथे	तोत्ताध्वे
उ० तोत्ताहे	तोत्तास्वहे	तोत्तास्महे

पर० लृट्

प्र० तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति
म० तोत्स्यसि	तोत्स्यथः	तोत्स्यथ
उ० तोत्स्यामि	तोत्स्यावः	तोत्स्यामः

आ० लृट्

प्र० तोत्स्यते	तोत्स्येते	तोत्स्यन्ते
म० तोत्स्यथे	तोत्स्येथे	तोत्स्यध्वे
उ० तोत्स्ये	तोत्स्यावहे	तोत्स्यामहे

पर० लोट्

तुदतु, तुदतात्	तुदताम्	तुदन्तु
तुद, तुदतात्	तुदतम्	तुदत
तुदानि	तुदाव	तुदाम

आ० लोट्

प्र० तुदताम्	तुदाताम्	तुदन्ताम्
म० तुदस्व	तुदाथाम्	तुदध्वम्
उ० तुदै	तुदावहै	तुदामहै

पर० लङ्

प्र० अतुदत्	अतुदताम्	अतुदन्
म० अतुदः	अतुदतम्	अतुदत
उ० अतुदम्	अतुदाव	अतुदाम

आ० लङ्

प्र० अतुदत	अतुदाताम्	अतुदन्त
म० अतुदथाः	अतुदाथाम्	अतुदध्वम्
उ० अतुदे	अतुदावहि	अतुदामहि

पर० विधौ लिङ्

प्र० तुदेत्	तुदेताम्	तुदेयुः
म० तुदेः	तुदेतम्	तुदेत
उ० तुदेयम्	तुदेव	तुदेम

आ० विधौ लिङ्

प्र० तुदीत	तुदीयाताम्	तुदीरन्
म० तुदीथाः	तुदीयाथाम्	तुदीध्वम्
उ० तुदीय	तुदीवहि	तुदीमहि

पर० आशिषि लिङ्

प्र० तुद्यात्	तुद्यास्ताम्	तुद्यासुः
म० तुद्याः	तुद्यास्तम्	तुद्यास्त
उ० तुद्यासम्	तुद्यास्व	तुद्यास्म

आत्मनेपदे

प्र० तुत्सीष्ट	तुत्सीयास्ताम्	तुत्सीरन्
म० तुत्सीष्ठाः	तुत्सीयास्थाम्	तुत्सीध्वम्
उ० तुत्सीय	तुत्सीवहि	तुत्सीमहि

पर० लुङ् ।

प्र० अतौत्सीत्	अतौत्ताम्	अतौत्सुः
म० अतौत्सीः	अतौत्तम्	अतौत्त
उ० अतौत्सम्	अतौत्स्व	अतौत्स्म

आ० लुङ् ।

प्र० अतुत्त	अतुत्साताम्	अतुत्सत
म० अतुत्थाः	अतुत्साथाम्	अतुद्ध्वम्
उ० अतुदि	अतुद्वहि	अतुन्महि

पर० लृङ्

प्र० अतोत्स्यत्	अतोत्स्यताम्	अतोत्स्यन्
म० अतोत्स्यः	अतोत्स्यतम्	अतोत्स्यत
उ० अतोत्स्यम्	अतोत्स्याव	अतोत्स्याम

आ० लृङ्

अतोत्स्यत	अतोत्स्येताम्	अतोत्स्यन्त
अतोत्स्यथाः	अतोत्स्येथाम्	अतोत्स्यध्वम्
अतोत्स्ये	अतोत्स्यावहि	अतोत्स्यामहि

रुधादिगणीयो रुधिर् आवरणे धातुः ।

पर० लट् ।

रुणद्धि	रुन्ध्यः	रुन्धन्ति
रुणत्सि	रुन्धः	रुन्ध
रुणधि	रुन्ध्वः	रुन्ध्मः

आ० लट्

रुन्धे	रुन्धाते	रुन्धते
रुन्त्से	रुन्धाथे	रुन्ध्वे
रुन्धे	रुन्ध्वहे	रुन्ध्महे

पर लिट्

रुरोध	रुरुधतुः	रुरुधुः
रुरोधिथ	रुरुधथुः	रुरुध
रुरोध	रुरुधिव	रुरुधिम

आ० लिट्

रुरुधे	रुरुधाते	रुरुधिरे
रुरुधिषे	रुरुधाथे	रुरुधिध्वे
रुरुधे	रुरुधिवहे	रुरुधिमहे

पर० लुट्

रोद्धा	रोद्धारौ	रोद्धारः
रोद्धासि	रोद्धास्थः	रोद्धास्थ
रोद्धास्मि	रोद्धास्वः	रोद्धास्मः

आ० लुट्

रोद्धा	रोद्धारौ	रोद्धारः
रोद्धासे	रोद्धासाथे	रोद्धाध्वे
रोद्धाहे	रोद्धास्वहे	रोद्धास्महे

पर० लृट्

रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति
रोत्स्यसि	रोत्स्यथः	रोत्स्यथ
रोत्स्यामि	रोत्स्यावः	रोत्स्यावः

आ० लृट्

रोत्स्यते	रोत्स्येते	रोत्स्यन्ते
रोत्स्यसे	रोत्स्येथे	रोत्स्यध्वे
रोत्स्ये	रोत्स्यावहे	रोत्स्यामहे

पर० लोट्

रुणद्धु रुन्धात्	रुन्धाम्	रुन्धन्तु
रुन्त्स्व ,,	रुन्धम्	रुन्द्ध
रुणधानि	रुणधाव	रुणधाम

आ० लोट्

रुन्धाम्	रुन्धाताम्	रुन्धताम्
रुन्त्स्व	रुन्धाथाम्	रुन्ध्वम्
रुणधै	रुणधावहै	रुणधामहै

पर० लङ्

अरुणत्-द्	अरुन्धाम्	अरुन्धन्
अरुणः अरुणत्	अरुन्धम्	अरुन्ध
अरुन्धम्	अरुन्ध्व	अरुन्ध्म

आ० लङ्

अरुद्ध	अरुधाताम्	अरुधत
अरुद्धाः	अरुधाथाम्	अरुद्ध्वम्
अरुधि	अरुधावहि	अरुधामहि

पर० विधौ लिङ्

रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात
रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम

आ० विधौ लिङ्

रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
रुन्धीय	रुन्धीवहि	रुन्धीमहि

पर० आशिषि लिङ्

रुन्ध्यात्	रुन्ध्यास्ताम्	रुन्ध्यासुः
रुन्ध्याः	रुन्ध्यास्तम्	रुन्ध्यास्त
रुन्ध्यासम्	रुन्ध्यास्व	रुन्ध्यास्म

आ० आशिषि लिङ्।

रुत्सीष्ट	रुत्सीयास्ताम्	रुत्सीरन्
रुत्सीष्ठाः	रुत्सीयास्थाम्	रुत्सीध्वम्
रुत्सीय	रुत्सीवहि	रुत्सीमहि

पर० लुङ्।

अरुधत्	अरुधताम्	अरुधन्
अरुधः	अरुधतम्	अरुधत
अरुधम्	अरुधाव	अरुधाम

पक्षे

अरौत्सीत्	अरौत्ताम्	अरौत्सुः
अरौत्सीः	अरौत्तम्	अरौत्त
अरौत्सम्	अरौत्स्व	अरौत्स्म

आ० लुङ्

अरुद्ध	अरुत्साताम्	अरुत्सत
अरुद्धाः	अरुत्साथाम्	अरुद्ध्वम्
अरुद्धे	अरुद्वहि	अरुन्महि

पर० लृङ्

अरोत्स्यत्	अरोत्स्यताम्	अरोत्स्यन्
अरोत्स्यः	अरोत्स्यतम्	अरोत्स्यत
अरोत्स्यम्	अरोत्स्याव	अरोत्स्याम

आ० लृङ्

अरोत्स्यत	अरोत्स्येताम्	अरोत्स्यन्त
अरोत्स्यथाः	अरोत्स्येथाम्	अरोत्स्यध्वम्
अरोत्स्ये	अरोत्स्यावहि	अरोत्स्यामहि

तनादिगणीयस्तनुविस्तारे धातुः।

पर० लट्

तनोति	तनुतः	तन्वन्ति
तनोषि	तनुथः	तनुथ
तनोमि	तनुवः	तनुमः
	तन्वः	तन्मः

आ० लट्

तनुते	तन्वाते	तन्वते
तनुषे	तन्वाथे	तनुध्वे
तन्वे	तनुवहे	तनुमहे
	तन्वहे	तन्महे

पर० लिट्

ततान	तेनतुः	तेनुः
तेनिथ	तेनथुः	तेन
ततान ततन	तेनिव	तेनिम

आ० लिट्

तेने	तेनाते	तेनिरे
तेनिषे	तेनाथे	तेनिध्वे
तेने	तेनिवहे	तेनिमहे

पर० लुट्

तनिता	तनितारौ	तनितारः
तनितासि	तनितास्थः	ततितास्थ
तनितास्मि	तनितास्वः	तनितास्मः

आ० लुट्

तनिता	तनितारौ	तनितारः
तनितासे	तनितासाथे	तनिताध्वे
तनिताहे	तनितास्वहे	तनितास्महे

पर० लृट्

तनिष्यति	तनिष्यतः	तनिष्यन्ति
तनिष्यसि	तनिष्यथः	तनिष्यथ
तनिष्यामि	तनिष्यावः	तनिष्यामः

आ० लृट्

तनिष्यते	तनिष्येते	ष्तनिष्यन्ते
तनिष्यसे	तनिष्येथे	तनिष्यध्वे
तनिष्ये	तनिष्यावहे	तनिष्यामहे

पर० लोट्

तनोतु तनुतात्	तनुताम्	तन्वन्तु
तनु ,,	तनुतम्	तनुत
तनवानि	तनवाव	तनवाम

आ० लोट्

तनुताम्	तन्वाताम्	तन्वाताम्
तनुष्व	तन्वाथाम्	तनुध्वम्
तनवै	तनवावहै	तनवामहै

पर० लङ्

अतनोत्	अतनुताम्	अतन्वन्
अतनोः	अतनुतम्	अतनुत
अतनोम्	अतनुव	अतनुम
	अतन्व	अतन्म

आ० लङ्

अतनुत	अतन्वाताम्	अतन्वत
अतनुथाः	अतन्वाथाम्	अतनुध्वम्
अतन्वे	अतनुवहि	अतनुमहि
	अतन्वहि	अतन्महि

पर० विधौ लिङ्

तनुयात्	तनुयाताम्	तनुयुः
तनुयाः	तनुयातम्	तनुयात
तनुयाम्	तनुयाव	तनुयाम

आ० विधौ लिङ्

तन्वीत	तन्वीयाताम्	तन्वीरन्
तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
तन्वीय	तन्वीवहि	तन्वीमहि

पर० आशिषिलिङ्

तन्यात्	तन्यास्ताम्	तन्यासुः
तन्याः	तन्यास्तम्	तन्यास्त
तन्यासम्	तन्यास्व	तन्यास्म

आ० आशिषिलिङ्

तनिषीष्ट	तनिषीयास्ताम्	तनिषीरन्
तनिषीष्ठाः	तनिषीयास्थाम्	तनिषीध्वम्
तनिषीय	तनिषीवहि	तनिषीमहि

पर० लुङ्

अतनीत्	अतनिष्टाम्	अतनिषुः
अतनीः	अतनिष्टम्	अतनिष्ट
अतनिषम्	अतनिष्व	अतनिष्म

अथ च

अतानीत्	अतानिष्टाम्	अतानिषुः
अतानीः	अतानिष्टम्	अतानिष्ट
अतानिषम्	अतानिष्व	अतानिष्म

आ० लुङ्

अतत,अतनिष्ट	अतनिषाताम्	अतनिषत
अतथाः,अतनिष्ठाः	अतनिषाथाम्	अतनिध्वम्
अतनिषि	अतनिष्वहि	अतनिष्महि

पर० लृङ्

अतनिष्यत्	अतनिष्यताम्	अतनिष्यन्
अतनिष्यः	अतनिष्यतम्	अतनिष्यत
अतनिष्यम्	अतनिष्याव	अतनिष्याम

आ० लृङ्

अतनिष्यत	अतनिष्येताम्	अतनिष्यन्त
अतनिष्यथाः	अतनिष्येथाम्	अतनिष्यध्वम्
अतनिष्ये	अतनिष्यावहि	अतनिष्यामहि

क्र्यादिगणी डुक्रीञ् द्रव्यविनिमये धातुः।

पर० लट्

क्रीणाति	क्रीणीतः	क्रीणन्ति
क्रीणासि	क्रीणीथः	क्रीणीथ
क्रीणामि	क्रीणीवः	क्रीणीमः

आ० लट्

क्रीणीते	क्रीणाते	क्रीणते
क्रीणीषे	क्रीणाथे	क्रीणीध्वे
क्रीणे	क्रीणीवहे	क्रीणीमहे

पर० लिट्

चिक्राय	चिक्रियतुः	चिक्रियुः
चिक्रियिथ चिक्रेथ	चिक्रियथुः	चिक्रिय
चिक्राय	चिक्रियिव	चिक्रियिम

आ० लिट्

चिक्रिये	चिक्रियाते	चिक्रियिरे
चिक्रियिषे	चिक्रियाथे	चिक्रियिध्वे
चिक्रिये	चिक्रियिवहे	चिक्रियिमहे

पर० लुट्

क्रेता	क्रेतारौ	क्रेतारः
क्रेतासि	क्रेतास्थः	क्रेतास्थ
क्रेतास्मि	क्रेतास्वः	क्रेतास्मः

आ० लुट्

क्रेता	क्रेतारौ	क्रेतारः
क्रेतासे	क्रेतासाथे	क्रेताध्वे
क्रेताहे	क्रेतास्वहे	क्रेतास्महे

पर० लृट्

क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति
क्रेष्यसि	क्रेष्यथः	क्रेष्यथ
क्रेष्यामि	क्रेष्यावः	क्रेष्यामः

आ० लृट्

क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे

पर० लोट्

क्रीणातु क्रीणीतात्	क्रीणीताम्	क्रीणन्तु
क्रीणीहि	क्रीणीतम्	क्रीणीत
क्रीणानि	क्रीणीव	क्रीणीम

आ० लोट्

क्रीणीताम्	क्रीणाताम्	क्रीणताम्
क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
क्रीणै	क्रीणावहै	क्रीणामहै

पर० लङ्

अक्रीणात्	अक्रीणीताम्	अक्रीणन्
अक्रीणाः	अक्रीणीतम्	अक्रीणीत
अक्रीणाम्	अक्रीणीव	अक्रीणीम

आ० लङ्

अक्रीणीत	अक्रीणाताम्	अक्रीणत
अक्रीणीथाः	अक्रीणीथाम्	अक्रीणीध्वम्
अक्रीणिय	अक्रीणीवहि	अक्रीणीमहि

पर० विधौ लिङ्

क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः
क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
क्रीणीयाम्	क्रीणीयाव	क्रीणीयाव

आ० विधौ लिङ्

क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
क्रीणीय	क्रीणीवहि	क्रीणीमहि

पर० आशिषि लिङ्

क्रीयात् क्रीयास्ताम् क्रीयासुः
क्रीयाः क्रीयास्तम् क्रीयास्त
क्रीयासम् क्रीयास्व क्रीयास्म

आ० आशिषि लिङ्

क्रेषीष्ट क्रेषीयास्ताम् क्रेषीरन्
क्रेषीष्ठाः क्रेषीयास्थाम् क्रेषीध्वम्
क्रेषीय क्रेषीवहि क्रेषीमहि

पर० लुङ्

अक्रैषीत् अक्रैष्टाम् अक्रैषुः
अक्रैषीः अक्रैष्टम् अक्रैष्ट
अक्रैषम् अक्रैष्व अक्रैष्म

आ० लुङ्

अक्रेष्ट अक्रेषाताम् अक्रेषत
अक्रेष्ठाः अक्रेषाथाम् अक्रेढ्वम्
अक्रेषि अक्रेष्वहि अक्रेष्महि

पर० लृङ्

अक्रेष्यत् अक्रेष्यताम् अक्रेष्यन्
अक्रेष्यः अक्रेष्यतम् अक्रेष्यत
अक्रेष्यम् अक्रेष्याव अक्रेष्याम

आ० लृङ्

अक्रेष्यत अक्रेष्येताम् अक्रेष्यन्त
अक्रेष्यथाः अक्रेष्येथाम् अक्रेष्यध्वम्
अक्रेष्ये अक्रेष्यावहि अक्रेष्यामहि

चुरादिगणीयश्चुरस्तेये धातुः ।

पर० लट्

चोरयति चोरयतः चोरयन्ति
चोरयसि चोरयथाः चोरयथ
चोरयामि चोरयावः चोरयामः

आ० लट्

चोरयते चोरयेते चोरयन्ते
चोरयसे चोरयेथे चोरयध्वे
चोरये चोरयावहे चोरयामहे

लिट्

चोरयामास चोरयामासतुः चोरयामासुः
चोरयामा- चोरयामा- चोरयामास
सिथ सथुः
चोरयामास चोरयामासिव चोरयामासिम

अथ च्वि

चोरयाञ्चकार चोरयाञ्चक्रतुः चोरयाञ्चक्रुः
चोरयाञ्चकर्थ चीरयाञ्चक्रथुःचोरयाञ्चक्र
चोरयाञ्चकार चोरयाञ्चकृव चोरयाञ्चकृम

अन्यच्च

चोरयाम्बभूव चोरयाम्बभू- चोरयाम्ब-
वतुः भूवुः
चोरयायाम्ब- चोरयाम्ब- चोरयाम्ब-
भूविथ भूवथुः भूव
चोरयाम्बभूव चोरयाम्ब- चोरयाम्बभू-
भूविव विम

पर० लुट्

चोरयिता चोरयितारौ चोरयितारः
चोरयितासि चोरयितास्थः चोरयितास्थ
चोरयितास्मि चोरयितास्वः चोरयितास्मः

आ० लुट्

चोरयिता चोरयितारौ चोरयितारः
चोरयितासे चोरयितासाथे चोरयिताध्वे
चोरयिताहे चोरयितास्वहे चोरयितास्महे

पर० लृट्

चोरयिष्यति चोरयिष्यतः चोरयिष्यन्ति
चोरयिष्यसि चोरयिष्यथः चोरयिष्यथ
चोरयिष्यामि चोरयिष्यावः चोरयिष्यामः

आ० लृट्

चोरयिष्यते चोरयिष्येते चोरयिष्यन्ते
चोरयिष्यसे चोरयिष्येथे चोरयिष्यध्वे
चोरयिष्ये चोरयिष्यावहे चोरयिष्यामहे

पर० लोट्

चोरयतु	चोरयताम्	चोरयन्तु
चोरय	चोरयतम्	चोरयत
चोरयानि	चोरयाव	चोरयाम

आ० लोट्

चोरयताम्	चोरयेताम्	चोरयन्ताम्
चोरयस्व	चोरयेथाम्	चोरयध्वम्
चोरये	चोरयावहे	चोरयामहे

पर० लङ्

अचोरयत्	अचोरयताम्	अचोरयन्
अचोरयः	अचोरयतम्	अचोरयत
अचोरयम्	अचोरयाव	अचोरयाम

आ० लङ्

अचोरयत	अचोरयेताम्	अचोरयन्त
अचोरयथाः	अचोरयेथाम्	अचोरयध्वम्
अचोरये	अचोरयावहि	अचोरयामहि

पर० विधौ लिङ्

चोरयेत्	चोरयेताम्	चोरयेयुः
चोरये	चोरयेतम्	चोरयेत
चोरयेयम्	चोरयेव	चोरयेम

आ० विधौ लिङ्

चोरयेत	चोरयेताम्	चोरयेरन्
चोरयेथाः	चोरयेथाम्	चोरयेध्वम्
चोरयेय	चोरयावहि	चोरयामहि

पर० आशिषि लिङ् ।

चोर्यात्	चोर्यास्ताम्	चोर्यासुः
चोर्याः	चोर्यास्तम्	चोर्यास्त
चोर्यासम्	चोर्यास्व	चोर्यास्म

आ० आशिषिलिङ्

चोरयिषीष्ट	चोरयिषीयास्ताम्	चोरयिषीरन्
चोरयिषीष्ठाः	चोरयिषीयास्थाम्	चोरयिषीध्वम्
चोरयिषीय	चोरयिषीवहि	चोरयिषीमहि

पर० लुङ्

अचूचुरत्	अचूचुरताम्	अचूचुरन्
अचूचुरः	अचूचुरतम्	अचूचुरत
अचूचुरम्	अचूचुराव	अचूचुराम

आ० लुङ्

अचूचुरत	अचूचुराताम्	अचूचुरन्त
अचूचुरथाः	अचूचुराथाम्	अचूचुरध्वम्
अचूचुरम्	अचूचुराव	अचूचुराम

पर० लृङ्

अचोरयिष्यत्	अचोरयिष्यताम्	अचोरयिष्यन्
अचोरयिष्यः	अचोरयिष्यतम्	अचोरयिष्यत
अचोरयिष्यम्	अचोरयिष्याव	अचोरयिष्याम

आ० लृङ्

अचोरयिष्यत	अचोरयिष्येताम्	अचोरयिष्यन्त
अचोरयिष्ठाः	अचोरयिष्येथाम्	अचोरयिष्यध्वम्
अचोरयिष्ये	अचोरयिष्यावहि	अचोरयिष्यामहि

श्रीनाथद्वारा आयुर्वैदिक फार्मेसी.

हमारे यहां शास्त्रोक्त विधिसे बनाई हुई औषधियां रस, भस्म, रसायन, गुटिका वटिका, चूर्ण, अवलेह, पाक, सत्व, क्षार, द्रव, घृत, तैल, अर्क आदि उचित मूल्य पर तैयार मिलती हैं। वैद्यबन्धु एवं गुणग्राहक पुरुष यदि अपनी उपस्थिति में कोई औषधि तैयार करवाना चाहें तो श्रीनाथजीके दर्शनार्थ आवें और यथाभिमत हमसे लाभ उठावें। दुर्लभ बनौषधियों के लिए हमें लिखें।

फार्मेसी से संबन्ध रखने वाला "श्रीजगन्नाथ औषधालय" दश वर्ष से सेवा कर रहा है। औषधालय की सहकारिणी "श्रीसुबोधिनीसंस्कृत-पाठशाला" से जिज्ञासु छात्र लाभ उठाने की चेष्टा करें।

पत्रव्यवहारका पता—

मॅनेजर—**श्रीनाथद्वारा आयुर्वैदिक फार्मेसी,**

गोपालपुरा, नाथद्वारा.

Books by the same author.

1	How to talk Sanskrit Part I (Eng-Sans)	As. 8
2	„ „ „ „ II „	„ 8
3	„ „ „ „ III „	„ 10
4	संभाषा A Sanskrit English dialogue Part I	„ 8
5	„ „ „ „ „ II	„ 8
6	„ „ „ „ „ III	„ 10
7	How to learn Sanskrit Grammar.	„ 10
8	A little Sanskrit Grammar.	„ 10
9	लघुसंस्कृतनिबन्धावली.	Rupee 1
10	संस्कृतशिक्षावली प्रथमो भागः	As. 4

To be had.

(1) Bharati Mandiram, Nathdwara.

(2) N. M. Tripathi, Bombay.